# तृतीयोऽध्याय

## (पुराणेषु ज्यौतिषतत्त्वानां निरूपणम्)

# तृतीयोऽध्याय

## (पुराणेषु ज्यौतिषतत्त्वानां निरूपणम्)

1.पुराणेषु ग्रहाणाम निरूपणम्।

2.ग्रहाणाम् शान्त्यर्थम् कर्मकाण्डीयोपायश्च।

3.पुराणेषु नक्षत्राणाम् निरूपणम्।

4.नक्षत्राणाम् शान्त्यर्थम् कर्मकाण्डीयविधानम्।

5.पुराणेषु योगः, करणानितिथ्यादीनां कर्मकाण्डीयशमनोपायश्च।

# 1.पुराणेषु ग्रहाणाम निरूपणम्

**ग्रहाणां स्वरूपञ्च स्तवनम् :---**

ग्रहाणां स्वरूपं कीदृशम्? तेषां स्वभाव: की दृश:? गुणादीनां समपूर्ण विवेचनमत्र भागवतपुराणम् आधारीकृत्य विज्ञापयामो वयम् अत्र। ग्रहाणां विषये भाषते यत् --

ग्रहा: राज्यं प्रयच्छन्ति ग्रहा: राज्यं हरन्ति च।
ग्रहैश्च व्यापितं सर्वं त्रैलोक्यं सचराचरम्।।

इत्थभूता: ग्रहा: विशेषण लगनेश: पूजनेन तुष्ट: सति सकलैश्चर्यं प्रयच्छति स्तवनकतृकेभ्य: भक्तेभ्य: वयंमत्र पौराणिकं व्यासकृतं स्तवनं प्रस्तौम:।।

**द्वादशभावस्थसूर्यादि नवग्रहाणां शुभाशुभादीनां विचार:**

ग्रहै: शुभाशुभं वक्ष्ये देवि मेषादिराशित:।
चन्द्रशुक्रौ च जन्मस्थौ वर्जितौ शुभदायको।।
द्वितीयो मङ्गलोऽर्थाक: सौरिश्चैव तु सैहिंक:।
द्रव्यनाशमलाभं च आहवे भङ्गमादिशेत्।।
सोमो बुधो भृगुर्जीवो द्वितीयस्था: शुभावहा:।
तृतीयोस्थो यदा भानु शविभौम भृगुस्तथा।
बुधश्चैवेन्दु राहुश्च सेवेते फलदा ग्रहा:।

बुधशुक्रो चतुर्थौ च शेषाश्चैव भयावहाः।।
पञ्चमास्थो यदा जीवः शुक्रः सौम्यश्च चन्द्रमाः।
ददेत चेप्सितं लाभं षष्ठे स्थाने शुभो रविः।।
चन्द्रः सौरिमङ्गलश्च ग्रहा देवि स्वराशितः।
बुधश्च शुभदः षष्ठे त्यजेत्षष्ठं गुरुं भृगुम्।।
सप्तमाऽर्कः शनिभौमो राहुर्हान्ये सुखाय च।
जीवो भृगुश्च सौम्यश्च ज्ञशुक्रौ चाष्टमौ शुभौ।।
शेषा ग्रहास्तथा हान्यै ज्ञभृगु नवमौ शुभौ।
शेषा हान्यै च लाभाय सशमौ भृगुभाष्करौ।।
शनिभौमधश्च राहुश्च चन्द्रः सौम्यः शुभावहः।
शुभाश्चैकादशे सर्वे वर्जयेद्दशमं गुरुम्।
बुधशुक्रो द्वादशस्थौ शेषान्द्वादशगांस्त्यजेत्।।[1]

**शुभग्रहः**-- पूर्णचन्द्रः, बुधः, गुरू, शुकश्च।

**पापग्रहः--** क्षीणचन्द्रः, सूर्यः, भौमः, बुधपापयुत, शनिः।

---

1.अग्नि.- 127/3-10

# 2.ग्रहाणाम् शान्त्यर्थम् कर्मकाण्डीयोपायश्च

ज्योतिषशास्त्रे ग्रहाणां अतीव महत्वम् वर्तते। तत्र ग्रहकारणेन मनुषस्य शारीरिक व्याधि, मानसिकव्याधिः, विविधक्षेत्रेषु च अनेकाः आपत्तयाः भवन्ति। यतोहि ज्योतिषशास्त्र दृष्ट्या ग्रहाणां प्रभावः सर्वत्र सर्वेषु भवति। मनुषस्य जीवने अनेके व्याधयः भवन्ति ते व्याधयः सूर्यादिग्रहाः कारणानि भवन्ति यस्य जीवने ग्रहदोषकारणे रोगाः प्रादुर्भवन्ति ते रोगाः ग्रहजन्यरोगरूपेण स्वीक्रियन्ते। अत्र विविधग्रहाणामनुसारेण ये रोगाः भवन्ति तेषा विवेचनं ग्रहानुसारेण अत्र प्रस्तूयते। यथा ---

| **क्रम** | **ग्रहः** | **श्रोगनाम** | **विपत्तिनाम** |
|---|---|---|---|
| 1 | सूर्य | चर्मरोगः | दृष्टिदोष, आत्मबलन्यूवता |
| 2 | चन्द्र | मस्तिष्करोगः | अस्थिरता, मानसिक अशान्ति |
| 3 | मंगल | रक्तरोगः | भूमिदोष, स्थानपरिवर्तन, |
| 4 | बुध | अस्थिमज्जादि | मूत्ररोग (Diabetes) |
| 5 | गुरु | | विद्यायाम् अवरोधः |
| 6 | शुक्र | शुक्रादिरोगः | स्त्रीकलहः, उदरविकारः |
| 7 | शनि | उदरतः अधोभीरोगः | सर्वदृष्ट्याः आपत्तिः |
| 8 | राहु | तथैव | तथैव |
| 9 | केतु | तथैव | तथैव |

ज्यौतिषशास्त्रस्य अनेकेषु ग्रन्थेषु ग्रहजन्य रोगविषये विस्तृतविवरणं प्राप्यते। तद्यथा ---

1. ग्रहदृष्टिकारणेन।
2. क्रूरग्रहकारणेन।
3. परस्पर शत्रुग्रहादि कारणेन।
4. ग्रहस्थितिकारणेन।

धर्मशास्त्रानुसारेण मनुष्यस्य जीवनस्य प्रारब्धं न केवलं एकजन्मनः भवति अपितु अनेकेषां जन्मना संचयेन भवति। हिन्दूधर्मानुसारेण प्रत्येक व्यक्तेः अन्यव्यक्तिना सह ऋणानुबंधाः वर्तन्ते, एतेषां ऋणबन्धानुबंधाना कारणेन मनुष्यः पुनः-पुनः जन्मं लभते। अतएव व्याधिभोग विना न कोऽपि अन्योपायः। अतः मनुष्याणां जन्मजात रोगाणां विषये सूक्ष्मतया विचारः कर्तव्यः तथा च व्याधेः कारणं किम् भवेत् इति विचारः अपि करणीयः। बहवः जातकाः जन्मतः एव मन्दबुद्धिः भवति। केचन जातकाः जन्मतः एव असाध्य रोगान् पीड़्यति। सः जातकः इहलोकस्य व्यवहारोऽपि न जानति। जातकस्य व्याधिः, रोगाणां दूरीकरणाय जातकस्य अवलोकनं अथवा अभ्यासं विना तस्य संबंधिनः ये जनाः जातकस्य पीड़ा निवारणाय न किमपि कर्तुम् शक्नोति। जातकः यदि क्रूरग्रहस्य महादशायां जातः तर्हि तस्य ग्रहस्य जपेन दानेन उपयोगः भवति। पितृदोषस्य अथवा अतृप्तपितराणां कारणेन अथवा तैः दत्तेन शाप कारणेन जातकः बहु दुखमनुभवति। तथा च कुलदेवतायाः अथवा

पूर्वसंकल्पित देवतायाः अनुष्ठानं यदि केन कारणेन पूर्णम् न जातम् तर्हि तेनापि व्याधयः उद्भवन्ति।

**जन्मकुण्डल्यानुसारेण ग्रहाणां शमनोपायाः ---**

ज्योतिषशास्त्रस्य आधारेण प्रतिमनुष्यस्य जीवने नवग्रहाणां (सूर्य, चन्द्र, मंगल, बुधः, वृहस्पति, शुक्र, शनिः, राहु केतुश्च।)प्रभावः भवति यदा ग्रहाणां शुभदृष्टिः जायते तदा किमपि नैव क्रियते जनैः किन्तु यदा ग्रहाणां अशुभफलं भवति तदा अस्योपयोगिता दृश्यते।

मानुष्यजीवने ग्रहाणां नक्षत्राणां प्रभावः दृश्यते।य येन प्रभावेण मानवजीवने परिवर्तनम् भवति। एतत् मतं न केवलं ज्योतिषं अपितु वैज्ञानिकैः अपि एवमेव मन्यते। मानवजीवेन मनुष्यस्य कुण्डल्यानुसारेण स्थित ग्रहदशायाः अनुसारेण मनुष्यः स्वजीवने वर्तनं करोति। ज्योतिषशास्त्रस्य चिकित्साशास्त्रस्य च परस्पर सबंधः न अद्यापि अपितु प्राचीनकालादेवास्ति। ज्योतिषशास्त्रस्य ज्ञानेन रोगाणां ज्ञानं अपि भवति तथा च निदानं अपि सरलतया भवति।

केचन् जनाः ज्योतिषशास्त्रं निन्दां करोति। कारणं एव ये जनाः अस्मात् शास्त्रात् अपरिचिताः, अनभिज्ञाश्च संति। औषधीषु वनस्पत्येषु च द्रव्येषु ग्रहाणां प्रभावः ऋग्वेदे इत्थं वर्णितं सन्ति। यथा --

''सोमेनादित्या बलिनः सोमेन पृथ्वी मही।''[1]

---

1.ऋग्वेद 10/7/582

ज्योतिषशास्त्रस्य महत्वं महर्षिः दयानन्दः अपि स्वरचित 'ऋग्वेद-- भाष्यभूमिकायाम्' स्वीकरोति। चन्द्रांशुभिः कश्चित् औषधयः निर्मीयन्ते याभिः श्वसनादिरोगेषु लाभकारिण्यः सन्ति। ज्योतिषशास्त्रस्य चिकित्साशास्त्रयोः तुलनां अपि कर्तुम् शक्यते। चिकित्साविज्ञानमपि ज्योतिषशास्त्रस्यैव आधारीभूतम् अस्ति। स्त्रीषु ऋतुधर्मः अपि चन्द्रभौमयोः स्थित्यानुसारं प्रवर्तते। प्राणिमात्रस्य शरीरे वेगस्य कारणमपि सूर्यः एव अस्ति।

ज्योतिषशास्त्रेण रोगाणाम् उत्पत्तिः रोगाणां प्रभावक्षेत्रं रोगाणां निदानं, रोगः कदा उत्पन्नः भवति, रोग कदा शमेत् नश्येत् वा न नश्येत् इत्यादिप्रश्नाः अवगन्तुं शक्यन्ते। वर्तमानकालेऽपि वैज्ञानिकानाम् उपकरणानि रोगस्य सूक्ष्मतामपि परिचितानस्ति तथापि अनेके रोगाः सन्ति येषां चिकित्सा अद्यापि नोपलब्धा अस्ति।

'पूर्वजन्मकृतं कर्म व्याधिरूपेण बाधते।

ज्योतिषशास्त्रस्य संबंधः न केवलं वर्तमानजन्मना सह अस्ति अपितु पूर्वजन्मनाम् अपि ज्ञानं यथारूपं कारयति अतः यानि-कानि पापानि भुक्तानि न सन्ति तानि पापानि इहजन्मनि अवश्यमेव भोग्यानि सन्ति। तेनैव कारणेन जन्मतः रोगाः प्रादुर्भवन्ति अथवा असाध्यरोगाः भवन्ति ते निवारयितुं न शक्याः संति। ये रोगाः निवारयितुं न शक्नुवन्ति तेषां रोगाणां कृते ज्योतिषशास्त्रः उपायं दातुम् समर्थाः भवति।

ज्योतिषशास्त्रे द्वादश राशयः, नवग्रहाः तथा सप्तविंशति नक्षत्राणि, करणानि, योगाः इत्यादयाः संति। जन्मकुण्डल्यां सर्वे ग्रहाः सर्वाश्च राशयः मनुष्याणां कस्मिन्नमपि अंङ्गे शरीरऽवयवे प्रभावयित्वा स्वयस्य प्रतिनिधित्वं कुर्वन्ति। यः ग्रहः अशुभत्वेन वर्तेत नीचस्थानगतो वा स्यात् सः तत्स्थानसम्बन्धिः अङ्गः प्रभावयतिनं राशिचक्रभावसम्बन्धिनं शरीरावयनिमत्तिं रोगः करोति इत्यर्थः।

सामान्यत्वेन तु राशिभिः ग्रहैः अपि रोगाणां निवारणं भवेत्। राशीनां ग्रहाणां प्रकृत्या रोगाणां निदानं कर्तम् शक्यते। यथा --

**सूर्यग्रहस्य शमनोपायाः ---**

काश्यपगोत्रः, कलिङ्गदेशः, रक्तधान्योपरि।

**रोगप्रदेशाः** -- पित्तप्रकोपः, शरीरेज्वलनम्, अपस्मारः हृदयरोगः, उष्णज्वरः, अधोरोगः, नाभिरोगः, चर्मरोगः इत्यादयाः।

**निवारणम् मन्त्रसंख्याः--** सूर्योदयाद् आरभ्य सूर्यस्य 7000 मन्त्रस्य।

**दानद्रव्यम् :--** रक्तवस्त्रम्, गुडदानानि, द्राक्षा। यज्ञस्यसमिधा-अर्कः।

**शमनोपायः जपार्थम् वैदिकमन्त्रः --**

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यंच ।

हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्।।

**शमनोपायः जपार्थम् पौराणिकमन्त्रः --**

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्।

तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्।।

**बीजमन्त्रः --**

ॐ ह्रां ह्रीं ह्रौं सः ॐ भूः भुवः स्वः ॐ सः हौं ह्रीं ह्राः।।

**चन्द्रग्रहस्य शमनोपायाः ---**

अत्रिगोत्रम्, यमुनातीरदेशः, श्वेतवर्णः

**रोगप्रदेशः --**

अतिनिद्रा, कफप्रकोपः, आलस्यम्, अतिसारः, शीतज्वरः, मन्दाग्निः रक्तविकारः, चित्तशिथिलता।

**निवारणम् मन्त्रसंख्याः --** सूर्योदयाद् आरभ्य सांयकालपर्यन्तं चन्द्रस्य 11000 संख्यकानां पुरश्चरणम्।

**शमनोपायः जपार्थम् वैदिकमन्त्रः --**

**ॐ इ**मं देवा असपत्न ँ सुवध्वं महते क्षत्राय
महते ज्येष्ठयाय महते जानराज्यायेन्द्रियाय।
इमममुष्य पुत्रमस्यै विशं एष वोऽमी
राजा सोमोऽस्माकं ब्राह्मणानां ँ राजा।।

**जपार्थम्पौराणिक मन्त्रः --**

दधिशंखतुषाराभं क्षीरोदार्णवसंभवम्।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम्।।

दानद्रव्यम् :---

रक्तवस्त्रम्, पुष्पम्, इक्षुः।

यज्ञसमिधा :---

पलाशः

**बीजमन्त्रः --**

ॐ सुवः भुवः भूः ॐ सः ॐ श्रौं ॐ श्रीं ॐ श्रां।

**मङ्गलग्रहस्य शमनोपायाः ---**

भारद्वाजगोत्रोत्पन्नः, अवन्तिकादेशः, रक्तधान्योपरि।

रोगप्रदेशाः ---

वायुजनितरोगाः, पित्तप्रकोपः, पित्तज्वरः, कुष्ठज्वरः, नेत्ररोगः, अपसमारः, मज्जारोगः, देहभङ्गः शरीरस्य उपरि भागसय रोगः।

दानद्रव्यम् :---

भूमिदानम्, रकतवस्त्रम्, रक्तपुष्पम्, रक्तधान्यम्, इत्यादयः।

यज्ञसमिधा :--- खदिरम्।

वैदिकमन्त्रः ---

ॐ अग्निर्मूर्द्धा दिवः ककुत्पत्तिः पृथिव्या अयम्।
अपा ॅ रेता ॅ सि जिन्वति।।

पौराणिकमन्त्रः ---

धरणीगर्भसंभूतं विद्युत्तेजस्सममप्रीाम्।
कुमारं शक्तिहस्तं च भौममावाहयाम्यहम्।।

**बुधग्रहस्य शमनोपायाः ---**

अत्रिगोत्रम्, मगधदेशः, हरितधान्योपरि।

रोगप्रदेशाः ---

भ्रन्तिः, नेत्ररोगः, कुष्ठरोगः, वात-पित्त-कफरोगादि, चर्मरोगः, दुःखस्वपनम्, नासिकारोगः।

निवराणम् :---

सूर्योदयाद् द्विघटिकानन्तरम् आरभ्य 4000 जपस्य पुरश्चरणम्।

दानद्रव्यम् :---

हरितधान्यम्, वस्त्रम्।

यज्ञसमिधा :-- अपामार्गः।

वैदिकमन्त्रः ---

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वष्टिापूर्ते सगं सृजेथामयं च।
अस्मिन्नधस्थे अध्युत्तरसिमने विश्वे देवा यजमानश्च सीदत।।

पौराणिकमन्त्रः ---

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।
सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम्।।

**बृहस्पतिग्रहस्य शमनोपायाः ---**

काश्यपगोत्रम्, सिन्धुप्रदेशम्, पीतवर्णः, पितधान्योपरि।

रोगप्रदेशाः ---

उदर, वर्णाकिददोषः, कर्णरोगः।

निवारणम् :----

नित्य-नैमित्तककर्मानन्तरं 19000 मन्त्राणां पुरश्चरणम्।

दानद्रव्यम् :---

पीतवस्त्रम्, पुष्पम्, पीतवस्तुः, सुवर्णम्, गुड़ः, अमावस्याव्रतम्।

यज्ञसमिधा :--- पिप्लम्।

वैदिकमन्त्रः ---

ॐ वृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतमज्जनेषु।
यद्दीदयच्चवस ऋतप्रजात तदस्समासु द्रविणं धेहि चित्रम्।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा।।

बीजमन्त्रः ---

ॐ ह्रां ह्रीं ह्रौं सः ॐ भुः भुवः सुवः।

पौराणिकमन्त्रः ---

देवानां च मुनीनां च गुरुं काञ्चनसंनिभम्।
वन्द्यभूतम् त्रिलोकानां गुरुमावाहयाम्यहम्।।

**शुक्रग्रहस्य शमनोपायाः ---**

भार्गवगोत्र, शुक्लवर्ण, भोजकटकदेश।

रोगप्रदेशाः ---

रक्तस्वल्पताज कफरोगः, वायुरोगः, प्रमेहः, नेत्ररोगः, जनेन्द्रिय रोगः, वीर्यस्वल्पता।

निवारणम् :---

प्रातः नित्य-नैमित्तककर्मानन्तरं 16000 मन्त्राणां पुरश्चरणम्।

दानद्रव्यम् :---

श्वेतवस्त्रम्, पुष्पाणि, रजतम्, श्वेतपात्राणि, गोपूजासहायकसामग्री।

यज्ञसमिधा :-- औदुम्बरः।

वैदिकमन्त्रः ---

ॐअन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः।

ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमनधस इन्द्रेयन्द्रियमिदं पयोऽमृतं मधुः।

पौराणिकमन्त्रः---

हिमकुन्दमृणालाभं देत्यानां परमं गुरुम्।

सर्वशास्त्रप्रवक्तारं शुक्रमापाहयाम्याहम्।।

बीजमन्त्रः ---

ॐ सुवः भुवः भूः ॐ सः द्रौं द्रीं द्रां।।

**शनिग्रहस्य शमनोपायाः ---**

सौराष्ट्रप्रदेशः, काश्यपगोत्र, कृष्णवर्ण।

रोगप्रदेशाः --

वातजः, कफजः, कुक्षिरोगः, उष्णताजन्यरोगः, मानसिकचिन्ता इत्यादयाः।

निवारणम् :--

रात्रौ 23000 मन्त्राणां पुरश्चरणम्।

सहायकजपः -- मृत्युज्जयः।

दानद्रव्यम् :---

कृष्णवस्त्रम्, कृष्णतिलानि, कृष्णपात्रम्-धान्य-तैल्यादि।

समिधा :-- शमी।

वैदिकमन्त्रः ---

ॐ श नो देवीरभिष्टय आपो भवन्तु पीतये।

शं योरिभि स्रवन्तु नः।।

बीजमन्त्रः ---

ॐ खां स्रीं स्रौं सः ॐ भूः भुवः सुवः।।

पौराणिकमन्त्रः ---

नीलाजनसमाभासं रविपुत्रम् यमाग्रजम्।

छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम्।।

**राहुग्रहस्य शमनोपायाः---**

रठिनापुराम्, पैठीनगोत्रम्, नीलवर्णः, कृष्णधान्योपरि।

रोगप्रदेशाः---

हृदयरोगः, हृदयेतापः, भ्रान्तिः, पीड़ा, विषपीडा।

निवारणम् :---

प्रातः नितयनैमित्तककर्मान्तरं 18000 मन्त्राणां जपः।

दानद्रव्यम् :---

कपिलपदार्थाः, नारिकेलम्।

यज्ञसमिधा :--- दूर्वा।

वैदिकमन्त्रः ---

ॐ कयानश्चित्र आ भुवदूती सदावृधः सखा।

कया शचिष्ठया वृत्ता।।

बीजमन्त्रः --

ॐ भ्रां भ्रीं भ्रौं सः ॐ भूः भुवः सुवः।

पौराणिकमन्त्रः ---

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्।

सिंहिकागर्भसंभूतं तं राहुं प्रणाम्यहम्।।

**केतुग्रहस्य शमनोपायाः ---**

अन्तर्वेदिदेशः, जैमिनिगोत्रम्, ।

रोगप्रदेशााः ---

शनिवद् रोगप्रदेशाः।

निवारणम् :---

प्रातः नित्यनैमित्तकमानन्तरम् आरभ्य 17000 मन्त्राणां जपः।

सहायकजपः :-- मृतुज्जयः।

दानद्रव्यम् :----

कृष्णवस्तु, पात्र-पदार्थानि, दाडिमम्।

यज्ञसमिधा :--- दर्भः।

वैदिकमन्त्रः ---

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।

समुषद्भिरजायथाः।।

बीजमन्त्रः ---

ॐ प्रां प्रीं प्रौं सः ॐ भूः भुवः सुवः।

पौराणिकमन्त्रः ---

पलाश्पपुष्पसंकाशं तारकाग्रहमस्तकम्।

रौद्रं रौद्रात्मकं घोरं तु केतुं प्रणमाम्यहम्।।

# 3.पुराणेषु नक्षत्राणाम् निरूपणम्

**नक्षत्रशब्दस्य व्युत्पत्तिः---**

नक्षत्रमृक्षं भं तारा तारकाप्युडू वा स्त्रियाम्।''[1]

न क्षदते हिनस्ति। क्षद् इति सौत्रो धातुहिंसार्थम् आत्मनेपदी। उ(उ. 4.159) नभ्राण्नपाद् (6.3.75) इति नञः प्रकृतिभावः। यत्तु क्षदतीति विग्रहप्रदर्शनं मुकुटेन कृतम्। अभिनक्षिकलिभ्योऽत्रन् (उ.3.105) न क्षणेति वा। क्षणुहिंयायाम् (त.उ.)

**नक्षत्रशब्दस्यार्थः--**

अपरिमितगगनमण्डले दृष्टिगोचरीभूतेषु तेजोबिम्बेषु यानि सदैकरूपणतिनि सन्ति तानि नक्षत्रशब्देन ज्ञायन्ते। आकाशमण्डले सदैव एकगत्यैव प्रचलनयुक्ता दृष्यमाण तेजोविम्बानि नक्षत्ररूपेण अभिज्ञायते।

**नक्षत्राणांसख्याः गणना च--**

मूलतः ज्योतिषशास्त्रे नक्षत्राणां संख्या सप्तविंशत्यैव अस्ति। उत्तराषाढ़ानक्षत्रस्य चतुर्थपादस्य पञ्चदशघटिकां तथा श्रवणनक्षत्रस्य प्रथमचरणस्य चतुर्घटीकां नीत्वा अभिजितनक्षत्रस्य गणनां भवति।

नक्षत्राणां उत्पत्तिः कदा जातः इतिविषये एवं कथितुम् शक्नोति यदा ब्रह्माण्डस्यरचना जातः तेनैव सह नक्षत्राणामपि उद्भवोजातः। इति।

---

1.अमर.- 1.3.20

वैदिकग्रन्थाणां मध्ये नक्षत्राणां गणनाक्रमः कृतिकानक्षत्रतः एव आरम्भोभवति। यथा --

कृतिकानक्षत्रमग्निर्देवता --।।[1]

विविधाणाम् ग्रन्थानाम् अवलोकने इदं ज्ञायते यत् अश्विनी-नक्षत्रैव गणनाक्रमः दरीदृश्यते इति। ज्योतिषशास्त्रस्य ग्रन्थानां मध्ये अश्विनीनक्षत्रैव गणनाक्रमः प्रारम्भोभवति एव। सरलजन्मपत्री विज्ञानम् मध्ये एवं प्राप्यते --

वेश्वाधिष्णयांश्चपादस्य श्रुतेद्याब्धिनाडिका।

अभिजितनितिग्राह्य ह्यष्टाविंशतिभेषु।। (सरलजन्मपत्री विज्ञानं)

**वेदेषुनक्षत्राणम् वर्णनम् :---**

1.अभि श्यावं न कृशनेमिरश्यं नक्षत्रेभिः पितरो द्यामपिशन्।[2]

2.अयो नक्षत्राणामेषामुपस्थे सोम अहितः।।[3]

3.वाजिनिती सूर्यस्य योषा चित्रमघा राय इश वसूनाम्।।[4]

4.उषा अदर्शि रश्मिर्व्यक्ता चित्रामघा विश्वमनुप्रभूता।।[5]

---

1. तै.ब्रा. 4/4/10
2. ऋ.सं.10/68/11
3. ऋ.सं.10/85/2-14/1/2
4. ऋ.सं.7/75/5
5. ऋ.सं.7/77/3

**अथर्वसंहितायाम् नक्षत्राणम् वर्णनम् :---**

अथर्वसंहितायां मध्ये नक्षत्राणां वर्णनं ईदृशं अस्ति। यथा --

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि।

अष्टविंशः सुमतिमिचछमानो अहानि गर्भः सर्पयामि नाकम्।।

सुहवं में कृतिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा।

पुनर्वसु सूनृता चारु पुष्यो भानुराश्लेषा अयनं मघा मे।।

पुण्यं पूर्वाफाल्गुन्यौ चात्र,हस्तचित्रा शिवा स्वातिः सुखा मे अस्तु।

राधो विशाखे सुहवानुराधा ज्येष्ठासुनक्षत्रमरिष्टं मूलम्।।

अन्नं पूर्वा रासयां मे आषाढ़ा ऊर्ज ज्ये द्यूतरे आ वहन्तु।

अभिजिन्मे रासतां पुण्मये श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम्।।

आ मे महच्छभिषग्वरीय आ मे द्वया प्रोष्ठपदा सुशर्म।

आ रेवती चाश्वयुजौ भगं म आ रयिं भरण्य आ वहन्तु।।[1]

**ब्राह्मणग्रन्थे नक्षत्राणां वर्णनम् :---**

ब्राह्मणग्रन्थे नक्षत्राणां वर्णनं ईदृशं अस्ति। यथा ---

सूर्याया वहतुः प्रागात् सवितायमवासृजत्।

मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते।।

एता वा इन्दनक्षत्रं यतफल्गुन्योप्यस्य प्रतिनाम्नमोर्जनो हवै।

नामेन्द्रो यदस्य गुह्यं नामार्जन्यो वै नामैतास्ताः।।

---

1. अथर्व संहिता – 19/7
2. शतपथ. ब्रा. 2/1/2211

**तैत्तरीय ब्राह्मणे नक्षत्राणां देवता वर्णनम् :----**

अग्ने: कृत्तिका:। शुकं परस्ताज्ज्योतिरवस्तात्। प्रजापत रोहिणी। आप: परस्तादोषशयोवस्तात्। सोमस्योनवका वितितानि। परस्तात् वयन्तोवस्तात्। रुद्रस्य बाहु। मृगयव: परस्ताद्विक्षारोऽववस्तात्। आदितयै पुनर्वसु। बात: परदाद्रवस्तात्। बृहस्पस्तिष्य:। जुहृत: परस्ताद्यजमाना अवसतात्। सपारणाणमाश्रेषा:। अभ्याागच्छन्ते: परस्ताद्भ्यानृत्यन्तोवस्तात्। पितृणां मघा:। रुदन्त: परस्ताद्पभ्रंशोवस्तात्। अर्यम्ण: पूर्वेफाल्गुनी। जाया पभ्रंशोवस्तात्। अर्यम्ण: पूर्वेफाल्गुनी। जाया परस्तादृषभोवस्तात् सविरवस्तात्। इन्द्रस्य चित्रा। ऋतं परस्तातत्सत्यमवस्तात्। वायोर्निष्ट्या व्रतति:। परस्तादसिद्धिर- वस्तात्। इन्द्राग्नियोर्विशाखे। युगानि परस्तात्कृषमाणा अवस्तात्। मित्रस्यानुराधा:। अभ्यारोहत्परस्तादभ्या-रूढमवस्तात्। इन्द्रस्य रोहिणी। श्रृणत्परस्तात् प्रतिश्रृणदवस्तात्। निर्ऋत्यै मूलबर्हणी। प्रतिभञ्जन्त: परस्तात्प्रतिश्रृणन्तोवस्तात्। अपां पूर्वआषाढ़ा। वर्च: परस्तात्समितिरवस्तात्। विश्वेषां देवानामुत्तरा: अभिजयपरस्तादिभि: जिमवस्तात्। विष्णो: श्रोणा। पृच्छमाना: परस्तात्पन्था अवस्तात्। वसूनां ँश्रविष्ठा:। भतं परस्ताद्भूतिरवस्तात्। इन्द्रस्य शतभिषक। विश्वव्यचा: परस्ताद्विश्वक्षितिरवस्तात्। अजस्यौकपाद: पूर्वे प्रोष्ठपदा:। वैश्वानरं परस्ताद्वैश्वावसवमवस्तात्। अहेर्बुध्नयस्योत्तरे। अभिषिञ्चन्त: परस्ताद्। भिश्रृण्वन्तोवस्तात्। पूष्णो रेवती गाव: परस्तात् वत्सा अवस्तात्।

अश्विनोरश्वयुजौ। ग्रामः परस्तात्सेनावस्तात्। यमस्यापभरणीः। अपकर्षन्तः परस्तादपवहन्तोस्तात्। पूर्णा पश्चाद्यते देवा अदधुः।।[1]

**अग्निपुराणे नक्षत्राणां वर्णनम् :----**

अग्निपुराणे 136 अध्याये सप्तविंशति नक्षत्राणां वर्णनतस्ति। तद्यथा-

अ, भ, कृ, रो, मृ., आ, पुन., पु., आ., म., पू., उ, ह, चि, स्वा., वि., अनु., ज्ये, मू., पू., श्र., घ., श., उ., रे ।।नक्षत्राणि ज्ञेयानि।[2]

---

1. तै.ब्रा.1/5/11
2. अ.पु. 136/27-28

# नक्षत्र चक्रस्य कोष्ठकम्

| संकेताक्षर | पूर्णाक्षराणि | स्वामिनः | शुभाशुभ | ज्ञातयः | स्वरूपाणि |
|---|---|---|---|---|---|
| अ. | अश्विनी | अ.कुमार | शुभम् | वैश्य | अश्वमुखं |
| भ. | भरणी | यम | नाशक | अशुभम् | योनि |
| कृ. | कृतिका | वन्हि | अशुभम् | ब्राह्मण | क्षुराकृति |
| रो. | रोहिणी | ब्रह्मा | शुभम् | शूद्र | शकटवत् |
| मृग. | मृगशीर्ष | चन्द्र | शुभम् | कृषक | मृगस्य सादृश्यम् |
| आ. | आर्द्रा | शिव | शुभम् | क्रूरजाति | मणि |
| पुन. | पुनर्वसु | अदिति | शुभम् | वैश्य | गृहाकृति |
| पु. | पुष्य | गुरू | शुभम् | क्षत्रिय | वीणाकृति |
| आ. | आश्लेषा | सर्प | अशुभम् | चाण्डाल | चक्राकारम् |
| म. | मघा | पितर | शोक | शूद्र | गृहाकार |
| पूर्व. | पूर्वाफाल्गुनी | भग | अशुभ | ब्राह्मण | मंच |
| उत्तरा. | उत्तराफाल्गुनी | अर्यमा | शुभ | क्षत्रिय | खट्वा |
| ह. | हस्त | सूर्य | शुभ | वैश्य | हस्त |
| चि. | चित्रा | त्वष्टा | शुभ | कृषक | मुक्ता |
| स्वा. | स्वाती | वायु | शुभ | क्रूर | प्रवाल |
| वि. | विशाखा | इन्द्राग्नि | अशुभ | चण्डाल | तोरण |
| अनु. | अनुराधा | मित्र | शुभ | शूद्र | बलि |
| ज्ये. | ज्येष्ठा | इन्द्र | शुभ | कृषक | कुंडल |
| मू. | मूल | राक्षस | अशुभ | क्रूर | सिहंपुच्छ |
| पूर्वा. | पूर्वाषाढ़ा | जल | अशुभ | क्षत्रिय | गजदन्त |
| उत्तरा. | उत्तराषाढ़ा | विश्वदेव | शुभ | क्षत्रिय | मंच |
| श्र. | श्रवण | विष्णु | शुभ | चाण्डाल | वामन |
| धनि. | धनिष्ठा | वसु | शुभ | कृषक | मृदंग |
| शत. | शतभिषा | वरुण | शुभ | कृषक | वर्तुल |
| पूर्वा. | पूर्वाभाद्रपदा | अजच. | अशुभ | ब्राह्मण | मंच |
| उत्तरा. | उत्तराभाद्रपदा | अहिर्बुध | शुभ | क्षत्रिय | युग्म |
| रे. | श्रेवती | पूषा | शुभ | शूद्र | मर्दल |

**नक्षत्रगण्डान्तविचारः ---**

अग्निपुराणस्य 126 अध्याये नक्षत्रगण्डान्तस्य वर्णनमपिऽस्ति। तद्यथा --

पुनर्वक्ष्यामि गण्डान्तमृक्षेमध्ये यथा स्थितम्।
रेवन्त्यन्ते चतुष्कं तु अश्विन्यादि चतुष्टयम्।।
उभयोर्याममात्रं तु वर्जयेत्तप्रयत्नतः।
अश्लेशान्ते मघादौ तु घटिकानां चतुष्टयम्।।
द्वितीयं गण्डमाख्यान्तं तृतीयंभैरवि श्रृणु।
ज्येष्ठामूलयोर्मध्य उग्ररूपं तु यामकम्।।
न कुर्याच्छुभकर्माणि यदीच्छेदात्मजीवितम्।
दारके जातकाले च म्रियते पितृमातरौ।।[1]

**ज्योतिषाचार्याणांमते नक्षत्रविचारः ---**

ज्योतिषाचार्येण मते नक्षत्राणां गणना वेदात् भिन्नं भवति। वेदे नक्षत्राणां आरम्भः कृत्तिकानक्षत्र तः भवति। किन्तु ज्योतिषे नक्षत्राणां गणना अश्विनी नक्षत्र तः प्रारम्भो भवति। ज्योतिषसाहित्ये नक्षत्राणां विविधप्रकाराणां संज्ञायाः विभज्य तत् संज्ञकनक्षत्रे के-के कार्याणां कृते शुभाशुभादीनां विविधपक्षाणां प्रयोजनादि विषये सूक्ष्मरूपेण विचारो कृताः ज्योतिषाचार्येण। यथा ---

---------------------------------------------

1. अ.पु.126/33-360

**चरसंज्ञकनक्षत्राणि :---**

स्वात्यादित्यश्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम्।

तस्मिन् गजादिकारोहो वाकिगमनागिकम्।।[1]

**संज्ञकनक्षत्राणि :---**

त्त्तरात्रय–राहिण्यो भष्करश्च स्थिरम्।

तत्र स्थिरं बीजगेहशान्त्यारामादि सिद्धये।।[2]

**उग्रनक्षत्रसंज्ञकनक्षत्राणि:---**

पूर्वात्रयं याम्येमघे उग्रं क्रूरं कुजस्तथा।

तस्मिन् घाताग्निशाठ्यानि विषशास्त्राडि।।

**मिश्रसंज्ञकनक्षत्राणि:---**

विशाखाग्नेनभे सौम्यो मिश्रं साधारणं स्मृतम्।

तत्राग्निकार्यं मिश्रं वृषोत्सर्गादि सिद्धयति।।[3]

**क्षिप्रसंज्ञकनक्षत्राणि:---**

हस्ताश्विपुष्यभिजित: क्षिप्रं लघु गुरुस्तथा।

तस्मिन् पण्यरतिज्ञनं भूषाशिल्पकलादिकम्।।[4]

---

1. मु.चि.नक्षत्र/3
2. मु.चि. नक्ष/2
3. मु. चिन्तामणि
4. मु. चिन्तामणि

**मृदुमैत्रीसंज्ञकनक्षत्राणिः---**

मृगात्यचित्रमित्रर्क्षं मृदु मैत्रं भृगुस्तथा।

तत्र गीतम्बरक्रीडा मित्रकार्यं विभूषणम्।।

**तीक्ष्णसंज्ञकनक्षत्राणिः---**

मूलेन्द्रार्द्राहिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम्।

तत्राभिचारघातोग्रभेदाः पशुदमादिकम्।।

**ऊर्ध्वाधस्तिङ्गमुखनक्षत्राणिः---**

मूलाहिमिश्रोग्रमश्चोमुखं भवेद्ध्र्वास्यमार्देज्यहरित्रयं।

तिर्यङ्गमुखं मैत्रकरालनिलादितिज्येष्ठश्विभानीदृशाकृत्यमेषु सत्।।[1]

**गृहारम्भस्य वर्णनम् :---**

विविधानां ग्रन्थानां मध्ये गृहारम्भस्य वर्णनं प्राप्नोति।गृहस्य प्रारम्भो कस्य नक्षत्रे शुभं भवति तथा च कस्मिन् नक्षत्रे अशुभं भवति इत्यादि वर्णनं विभिन्न ग्रंथेषु प्राप्यते। महर्षिव्यासेनऽग्निपुराणस्य 126 तमे अध्याये गृहारम्भस्य मुहूर्तवर्णनम् ईदृशं वर्तते। यथा ---

चैत्रं ज्येष्ठं तथा भाद्रमाश्विनं पौषमेव च।

माघं चैव परित्यज्य शेषमासे गृहं शुभम्।।[2]

---

1. मु.चि. नक्ष./4-9
2. अग्नि.121/37

अश्विनी रोहिणीमूलत्तरात्रयमैन्दवम्।

स्वाती हस्तोऽनुराधा च गृहारम्भे प्रशस्यते।।[1]

चैत्र-ज्येष्ठ-भाद्रपद-अश्विन-पौष-माघमासानां विहाय शेषमासेषु अश्विनी-रोहिणी-मूल-त्रयोत्तरा-मृगशिरा-स्वाती-हस्त-अनुराधानक्षत्रेषु गृहारम्भं शुभं भवति।

**वादरायणमते :---**

वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके।

सूत्रारम्भः शिलान्यासः स्तम्भारम्भः प्रशस्यते।।[2]

वादरायणमते वैशाख-फाल्गुन-पौष-श्रावण-मार्गशीर्षमोस सूत्रेण भूमिमापनंपूर्वकं शिलान्यासः स्थम्भारोपणं च शुभं भवति।

**मुहूर्तचिन्तामणौ :---**

पुष्पध्रुवेन्दुहरिसर्पजलैः सजीवै-

स्तद्वासरेण च कृतं सुराज्यदं स्यात्।

द्वीशाश्वितक्षवसुपाशिशवैः सशुक्रै-वा

सितस्य च गृहं धनधान्यदं स्यात्।।[3]

---

1. अग्नि.121/38
2. निसि.पृ.-732
3. वास्तु-प्र.26

पुष्य–श्रवण–आश्लेषा–पूर्वाषाढ़ा इत्यादि नक्षत्रैः गुरुणायुतैः गुरुवासरे निर्मितगृहं सुतराज्यप्रदं भवति। विशाखा– चित्रा – घनिष्ठा –शततारका आद्रानक्षत्रैः शुक्रणयुतैः शुभवासरे यदा गृहनिर्माणं कृतं तद् गृहं धनधान्यदा भवति। भैमेनयुतैः हस्त–पुष्य –रेवती –मघा –पूर्वाषाढ़ा –मूलनक्षत्रैः भौमवासरे यदा गुहस्य आरम्भः भवति तदा अग्निभयं पुत्रपीड़ां च ददाति।

**नारदमते :---**

सौम्ये फाल्गुन वैशाखे माघश्रावणकार्तिाः।

मासाः स्युर्गृहनिर्माणे पुत्ररोग्यधनप्रदाः।।[1]

**रत्नमालायाम् :----**

कर्कनक्ररिकुम्भेगतेर्के पूर्वापश्चिममुखानि गृहाणि।

तौलिमेषवृषवृचिककपाते दक्षिणोत्तरमुखानि वदन्ति।।[2]

कन्या मकरसिंह कुम्भराशे स्थित सूर्ये पूर्वपश्चिमाभिमुखः गृहस्य निर्माणं शुभं भवति। तुला–मेष–वृषभ–वृश्चिकराशे स्थित– दिवाकरे उत्तरादक्षिणाभिमुखगृहस्य निर्माणं करणीयं।

---

1. नि.सि.पृ.732
2. रत्नमालायाम्

**ज्यौतिषतत्त्वे :---**

पूर्वपरास्यन्तु नभोऽन्त्यपौषे याम्योत्तरास्यं सहसि द्वितीये।

कार्यं गृहं जीवबुधर्क्षजार्के नीचस्तगौ जीवसिता च हित्वा।।[1]

धनमीनमिथुनराशि मध्ये स्थित सूर्ये निचास्त गुरुशुक्रयोः विहायं पूर्वश्चिमाभि मुखगृहस्य निर्माणं शुभं भवति। श्रावणफाल्गुनपौषमासेषु याम्योत्तराभिमुखगृहयोः निर्माणं अपि शुभं भवति।

**दैववल्लभे :---**

दैववल्लभेन विविध मासेषु निर्मितेषु गृहेषु फलानि इत्थं प्रकारेण वर्णितमस्ति। यथा --

शोकं धान्यं पञ्चतां निःपशुत्वं

स्वापं नैः स्वं सङ्गरं मृत्युनाशम्।

स्वं श्रीप्राप्ति बह्निभीतिं च लक्ष्मीं

कुर्यश्चैत्राद्या गृहारम्भ काले।।[1]

---

1. नि.सि.-733
2. निसि. 533

## 4.नक्षत्राणाम् शान्त्यर्थम् कर्मकाण्डीयविधानम्

ज्योतिषशास्त्रे नक्षत्रज्ञानं सूक्ष्म तथा मूलगामी चास्ति। अतएव तस्य अध्ययनम् अतीव आवश्यकम् महत्वपूर्ण च। नक्षत्रज्योतिषः सहायेन वयं मानवः यानि दु:खानि तेषां मेलकारणं अन्वेष्टुम् शक्नुमः। प्रत्येकनक्षत्रस्य मानवस्य जीवनोपरि प्रभावः दृश्यते। अतः चन्द्रनक्षत्रं, सूर्यनक्षत्रं तथा लग्ननक्षत्रं इत्यादि घटकानां विचारं कृत्वा एव ज्योतिषज्ञः तस्य फलं कथयति। नक्षत्राणां सहाय्येन मानवाय ये तापाः अथवा व्याधयः पीडयन्ति तासां निवारणम् शक्यम् भवति। स्वस्य नक्षत्रदेवतायाः पूजनेन अर्चनेन च भाग्योदयः भवति तथा शारीरिकदु:खानि अपि विनश्यन्ति।

**अश्विनीनक्षत्रस्य शमनोपायाः ---**

**देवता:--** अश्विनीकुमारौ।

**नाममंत्रः ---**

अश्विनीकुमाराभ्यां नमः इति नवाक्षरमन्त्रस्य जपः कर्तव्यः।

सर्वेषां देवानांमध्ये अश्विनीकुमारौ युवा तथा यमलौ च। अश्विनीकुमारौ त्रिलोकेषु संचरन्तः एतत् कारणाद् तस्य वायव्य-आकाशे स्थानं वर्तते। व्याधिग्रस्तानां व्याधिनिवारणाय विद्या ताभ्याम् अवगता आसीत्। वृद्धः च्यवनऋषये ताभ्यां यौवनं तथा च दृश्टिसामर्थ्यम् अपि दत्तम्। वेदे देवतानां वैद्यः धन्वन्तरिः वा इति एताभ्यां गौरवं कृतः।

**नक्षत्रस्य वृक्षः ---**

केचन जनाः वृषवृक्षाय अश्विनीनक्षत्रस्य आराध्यः वृक्षः मन्यते। अस्य वर्णः श्वेतः वर्तते। श्वेतवृषास्य कृष्णवृषस्य च परीक्षा तस्य पर्णानां सहायेन क्रियते। अस्य वृषस्य पुष्पाणि रक्तवर्णानि सन्ति। वृषस्य पर्णानि जन्तून तथा च जल शुद्धिकरणं कुर्वन्ति। अम्लपित्तं, क्षयः एतेषां कृते एषः वृक्षः श्रेष्ठः उपायः वर्तते। एषः वृक्षः हृदयाय श्वसनाय च बलं यच्छति। अस्य पर्णेषु पुष्पाणि फलानि च न अपक्षियन्ति।

केचन जनाः कारस्करः वृक्षः अपि अश्विनी वृक्षस्य मन्यते। अस्य फलानि मूलानि, पाणिनि सर्वं विषमयम् अस्ति। तथापि तानि अल्पमात्रायाः शुद्धं कृत्वा च उपयुक्तानि चेत् गुणकारी वर्तन्ते। एष विषमज्वरनाशकः तथा च पाचनक्रियायै, सुषुप्ति अवस्थायां अथवा जाग्रत अवस्थायां मूत्रविर्सजनाय समस्यायाः कृते तथा च कफविकारस्य कृते एतस्य उपयोगः भवति।

**वैदिकमन्त्रः ---**

तदश्विनावश्वयुजोप यातां। शुभगर्गिष्ठौ सुयमेभिरश्च।।
स्वं नक्षत्रं हविषा यजतौ। मध्वा संपृक्तौ यजुषा समक्तौ।।
यौ देवानां भिषजौ हव्यावाहौ। विश्वस्य दूतावमृतस्य गोपौ।।
तौ नक्षत्रं जुजषाणोपयातां। नमोऽश्विभ्यां कृणुमोऽश्वयुगभ्यां।।
अश्विभ्या स्वाहाश्वयुग्भ्या स्वाहा। श्रोतायस्वाहाश्रुत्यैस्वाहा।।

**भरणीनक्षत्रस्य शमनोपाया: ---**

देवता - यम:।

नाममंत्र: - ॐ यमाय नम:।

भरणीनक्षत्रं दक्षिणदिशायां दिक्पाल: संरक्षक: वा अस्ति। अतएव दक्षिणदिक् याम्य इति नाम्ना प्रसिद्धा। एष: अश्विनीकुमारयो: भ्राता अस्ति। अस्य सत्ता द्युलोके वर्तते। नचिकेताय मृत्यो: रहस्यं कथितम्। अस्य सर्वै: रहस्यं कठोपनिषदे प्राप्यते। यम: प्रजाया: कल्याणार्थ रत: निस्वार्थी देव: अस्ति। वेदेषु स: अमरदेव: इति नाम्ना प्रसिद्ध:। वस्तुत: अयं नक्षत्र: मानवानां मित्रम् अस्ति।

नक्षत्रस्य वृक्ष: ---

अस्य नक्षत्रस्य वृक्ष: आमलक: अस्ति। अयं वृक्ष: कषाय:, शीतलं च अस्ति। रक्तक्षय:, अग्निमन्द्यं, पित्तविकार:, नेत्ररोग: इत्यादि समस्यानां कृते आमलकस्य उपयोग: कर्तुम् शक्यते।आमलकेन स्मृति: तथा बृद्धि: वर्धते। गर्भाशय दुर्बलता दूरीभविष्यति। अस्य सेवनं रात्रौ न कर्तव्यम्, कारणं तु एतेषां रात्रौ सेवनेन दन्ता: क्षीणा: गच्छन्ति।

मन्त्र: ---

अप पाप्मानं भरणीर्भरतुं। तद्यमो राजा भगवान्विचष्टां।।
लोकस्य राजा महतो महन्हि। सुगं न: पंथामभयं कृणोत।।
यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिचंत देवा:।।
तदस्य चित्र हविषा यजाम। अप पाप्मानं भरणीर्भरंतु।।

**कृतिकानक्षत्रस्य शमनोपाया: ---**

देवता -- अस्य नक्षत्रस्य देवता अग्निः।

मन्त्रः -- अस्य नक्षत्रस्य मन्त्रः - ॐ आग्नये नमः।

पञ्चमहोभूतेषु अग्निः तेजसः देवता। प्राची तथा दक्षिण-दिशिः मध्ये या दिक् तस्याः एषः अधिपतिः। अतएव तस्याः अभिधानम् 'आग्नेयम्' इति विद्यते। वेदे याः मुख्या देवताः तासु अग्निः एका। गृहाय समृद्धिः परिवाराय कल्याणं स्वास्थ्यं य इच्छति तथा च सन्तानदात्री देवता नाम अग्निः इति। ऋग्वेदे अग्निदेवतायाः स्तुतिः भवति। अग्नि देवः मानवयोः मध्यस्थः। सः सर्वत्र जले अपि वर्तते। अतएव सः सर्वव्यापी अस्ति। अग्नि निवासस्थानं पृथ्वी मध्ये अस्ति अतः ऐहिकसुखार्थम् एवं लौकिकसुखार्थम् तस्य स्तुतिः वेदेषु कृता। अग्निः विविधानि स्वरूपाणि धारयित्वा कार्यं करोति यथा वडवानलः भूत्वाः सः सागरस्य जलस्य शोषणं करोति, वनहुताशनरूपेण खाण्डववनम् इव महन्ति वनानि अपि दहति। अग्निः रामायणे महाभारते मानवरूपेणाऽपि प्रकटिता अभवत्। जनाः अग्नेः बहुः प्रसिद्धः मन्यते एतद् कारणेन् विवाहादि संस्कारे तस्य स्थानं महत्वपूर्णम् वर्तते।

**कृत्तिकानक्षत्रस्य शमनोपायाः ---**

अस्य नक्षत्रस्य वृक्षः उदुम्बरः वर्तते।

अस्य नक्षत्रस्य वृक्षः सर्वज्ञातः शीतलगुणयुक्तः च। दाहकाग्नेः उपासनायाः या उष्णता भवति सा उदुम्बरस्य उपासनया न्यूनीभवति। शरीर-मन-बृद्धेः उपासनायाः अस्य नक्षत्रस्य उपासना भवति। अस्य वृक्षस्य सर्वाणि अंगानि भेषजगुणयुक्तानि ।मधुमहः, नेत्रदाहः, गर्भपात,

इत्यादि समस्या निवारणाय अस्य वृक्षस्य उपयोगः कर्तुम् शक्यते। धार्मिक दृष्ट्यापि अस्य वृक्षस्य महती उपयोगिता वर्तते। हवने अपि अस्य समिधा उपयुज्यते। कृतिका नक्षत्रः राक्षसगणः अस्ति, उदुम्बरस्य उपासना कारणेन स्वभावः सौम्यः भवति। अयं वृक्षः कफ, तथा पित्तनाशकः। अस्य पक्वानिफलानि अतिसेवनं वंध्यत्वाय भवति। अस्य फलानां मूलानां रसः मधुमेहस्य रुग्णानां कृते लाभदायी भवति।

मन्त्रः---

अग्निनैः पातुः कृत्तिकाः। नक्षत्रं देवमिन्द्रियं।।

इदमासां विचक्षणं। हविरासं जुहोतन।।

**रोहिणीनक्षत्रस्य शमनोपायाः ---**

देवता : -- ब्रह्मा तथा प्रजापतिः।

मन्त्रः --- ॐ ब्रह्मणे नमः।

अस्य नक्षत्रस्य देवता ब्रह्मा तथा प्रजापतिः। वेदेषु या देवता प्रजापतिः इति नाम्नाः प्रसिद्धा सा एव पुराणकालेषु ब्रह्मा अथवा ब्रह्मदेवः इति नाम्ना प्रसिद्धः अभवत्। एषः प्रजापतिः सृष्टिः रचनाकारः, सर्वायाः प्रजायाः अधिपतिः, देवदानवमनुष्यादि पिता च। एषः आकाशस्य परब्रह्म, विश्वस्य आत्मा। मनुस्मृतिकारः एवं मन्यते यत् सर्वम् देवतानां अन्तर्भावः प्रजापतौ एव भवति। येन कराणेन होमेषु, अग्निहोत्रेषु च प्रजापतये स्वाहा इति एका आहुतिः प्रजापतये वर्तते।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः जम्बूवृक्षः वर्तते। अयं वृक्षस्य फलानि आम्लानि, किच्चित तिक्तानि भवति। लवणयुक्तानि जम्बूवृक्षानि फलानि पचनाय सुलभानि भवन्ति तथा च लवणस्य प्रयोगः रुचिं वर्तते। मधुमेह रोगेण अपि अयं फलः सेवनं कर्तव्यः। मधुमेह, आम्लपित्तं, कफ इत्यादि समस्यानां समाधानं अस्य फलस्य सेवनाय भवति।

मन्त्रः ---

प्रजापते रोहिणी वेतु पतनी।विश्वरूपा बृहती चित्रभानुः।

सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदः सवीराः।।

रोहिणी देव्युदगात् पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना।।

मृगशीर्षनक्षत्रस्य शमनोपायाः ---

देवता :--- चन्द्रमा, सोमः।

ऋग्वेदानुसारं चन्द्रमाः विराट् विश्वपुरुषस्य मनसः जातः। ऋग्वेदानुसारं चन्द्रमाः विराट् विश्वपुरुषस्य मनसः जातः। फलज्योतिषशास्त्रानुसारं मनसः कारकः चन्द्रमा। यदि सः प्रतिकूलः तर्हि मानसिक अस्वस्थतायाः कारणं भवति। ब्रह्माण्डपुराणे तस्य उत्पत्तिः कृतिकानक्षत्रे जाता इति वर्णनम् अस्ति। चन्द्रमाः नाम सोमः इति वर्णनं पद्मपुराणे तैत्तरीयसंहितायां तथा शतपथब्राह्मणे विद्यते। सूर्यकुले चन्द्रमा यद्यपि पृथिव्याः उपग्रहः तथापि तस्य प्रभावः वनस्पतिजीवनेषु तथा प्राणिनां जीवने अपि सर्वाधिकः वर्तते इति आधुनिकविज्ञानस्य मतम्।

**नक्षत्रमन्त्रः** -- ॐ चन्द्रमनसे नमः।

**नक्षत्रस्यवृक्षः ---**

अस्य नक्षत्रस्य वृक्षः खदिरः इति। अस्य वृक्षस्य कण्टकानि सूक्ष्मानि कठिनानि च सन्ति। कुष्ठरोगस्य कृते अयं वृक्षः कल्पयुक्तः उपयुक्तः भवति। अस्य प्रयोगेन दन्तस्वास्थ्यं वर्धते। श्वेतखदिरस्य अथवा कृष्णखदिरस्य अपेक्षया अरुणखदिरः अधिकोपयुक्तः।

**मन्त्रः ---**

सोमो राजा मृगशीर्षेण आगन्। शिवं नक्षत्रं प्रियमस्य धाम।।
आप्यमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु।।
यत्ते नक्षत्रं मृगशीर्षमसित। प्रिय राजन्प्रियतमं प्रियाणां।।
तस्मै ते सोम हविषा विधेम्। शं न एधि द्विपदे शं चतुष्पदे।।
सोमाय स्वाहा मृगशीर्षाय स्वाहा।
स्वाहौषधीभ्यः स्वाहा। राज्यायस्वाहाभिजित्यैस्वाहा।।

**आर्द्रानक्षत्रस्य शमनोपायाः ---**

**देवताः --** अस्य देवता शङ्करः। देवतायाः स्वभावः शिवः तथा रुद्रः इति। ऋग्वेदे त्रीणि सूक्तानि देवतायाः वर्णनं कुर्वन्ति। शिवस्य कृपादृष्टिः भक्तोपरि सदैव वर्तते। शिवः उदारः, भक्तानां मनोरथं पूर्णं कृत्वा उपासकेभ्यां सः विपुलं सम्पत्तिं यच्छति। शङ्करः पशूनां कल्याणं करोति अतः पशुपतिः। शं नाम कल्याणं अतः शंकर इति शब्दस्य अर्थ अस्ति कल्याणकर्ता। रुद्ररूपेन स5 पापान् दण्डयति, शत्रून् रुद्रयति, सः बहुरूपा सिंह इव भयानकः, सः कामदेवं हन्ति तथा च सः जितेन्द्रियः देवतासु एकादश रुद्राः सन्ति। भगवानशिवः सर्व भूतगणानां

भैरवानां तथा च पशूनाम् नायकः। रुद्रसूक्तं तथा शिवमहिम्नस्त्रोतम् अतीव उपयुक्तम्।

नक्षत्रमन्त्रः -- ॐ शिवाय नमः तथा ॐ रुद्राय नमः।

**नक्षत्रस्य वृक्षः ---**

आर्द्रानक्षत्रस्य वृक्षः कृष्णागुरु वर्तते। एषः वृक्षः नाम चन्दनवृक्षस्य एव अन्या प्रजातिः। आसाम, हिमालय, नागालैण्ड इत्यादिषु प्रान्तेषु एषः वृक्षः दृश्यते। एषः वृक्षः कटुः तिक्तः, काषायः तथा च शीतल वर्तते। अस्य चूर्णस्य जलेन सह सेवनम् अतीव पुष्टिकरं भवति। कर्णव्याधीनाम् तथा च त्वचारोगनां कृते एषः उत्तमं भेषजम्।

अस्य नक्षत्रस्य अपरः वृक्षः बिभितकः। एषः वृक्षः सर्वत्र दृश्यते। अस्य फलानि भेषजानि निर्मातुम् उपयुक्तानि सन्ति। अस्य फलस्य आवरणं संग्राहकं भवति। कण्ठस्य तथा श्वासनलिकायाः समस्यानां कृते एषः उत्तमः उपायः। अस्य वृक्षस्य पुष्पाणि पीतवर्णयुक्तानि सन्ति।

मन्त्रः----

आद्रया रुद्रः प्रथमान एति। श्रेष्ठो देवानां पतिरघ्रियानां।।
नक्षत्रस्य हविषा विधेम। मा नः प्रजा रीरिषन्मोत वीरान्।।
हेती रुद्रस्य परिणो वृणक्तु।आर्द्रानक्षत्रं जुषता हविनः।।
प्रमुंचमानौ दुरितानि विश्वा। अपाघश संनुदतामरतिं।।
रुद्रायस्वार्द्रयैस्वाहा ।। पिन्वमानायैस्वाहापशुभ्यः स्वाहा।।

**पुनर्वसुनक्षत्रस्य शमनोपायाः ---**

देवता :--- अस्य नक्षत्रस्य देवता अदितिः अस्ति।

एषा देवतानां माता अस्ति। अष्टवसूनां अपि एषा एव माता। अधुना वैवस्वतमानोः मन्वन्तरं विद्यते। अस्य पिता विवस्वान् अदिते पुत्रः। अदितिः बन्धमोचनं करोति। अदितिः जीवनक्रं प्रवर्तयति। स्कन्दपुराणे अस्याः वर्णनं अस्ति। प्रातःकाले मध्यान्हे तथा च सांयकाले तस्याः आवाहनं कर्तव्यम् इति उक्तम् अस्ति।

नक्षत्रस्य मन्त्रः --- ॐ आदित्ये नमः।

**नक्षत्रस्य वृक्षः ---**

अस्य नक्षत्रस्य वृक्षः वंशवृक्षः। क्षयरोगः, दाहः, मूत्ररोगः, कफः, बहुमूत्रता इत्यादि समस्यानां कृते एतद् अतीव उपयुक्तम्। अस्य पर्णानि गवांकृते अतीव उपयुक्तानि। अयं वृक्षः मूलं कफं, पित्तनाशकम्, वंशलोचनं वातपित्तशमनं।

मन्त्रः ---

पुनर्नो देव्यदितिस्पृणोतु। पुनर्वसु नःपुनःरेतां यज्ञं।।

पुनर्नो देवा अभियंतु सर्वे। पुनः पुनर्वो हविषा यजामः।।

एवा न देव्यदितिरनर्वा। विश्वस्य भर्त्री जगतःप्रतिष्ठा।।

**पुष्यनक्षत्रस्य शमनोपायाः ---**

देवताः-- अस्य नक्षत्रस्य देवता वृहस्पतिः।

वृहतिः नाम बृहस्पतिनाः सर्वप्रथमं पतिः नाम बृहस्पतिः। भाषायाः वाण्याः वा महत्वं बृहस्पतिनां सर्वप्रथमं ज्ञातम्।अस्य अपरं नाम बृहणस्पतिः। सः विद्यत जनेषु विद्वान कविः अस्ति। एषः गणानां अधिपतिः अतः सः गणपतिः अपि कथ्यते। सः मनुष्याणां सन्मार्गम्

दर्शयति। तेषां रक्षणं अपि करोति। एषः देवतानां ऋषीणां च गुरुः तथा च पुरोहतः अस्ति। सूर्यकुलषु यः अतीव बलवान् ग्रहः –गुरु सः एव वृहस्पतिः इति नाम्ना प्रसिद्धः। गुरू सूर्यग्रहः इव महत्वपूर्णः। भुजबलस्य मतानुसारं यदि प्रत्रिकायां सः केन्द्रस्थाने वर्तते तर्हि सः इतरेभ्यः निष्प्रभं करोति।

नक्षत्रमन्त्रः --- ॐ बहस्पतये नमः।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः अश्वत्थः। एषः अतीव महत्वपूर्णः श्रेष्ठः च वृद्वाः अतः भगवान् गीतासु वाक्ति अहं वृक्षेषु अश्वत्थः इति। एषः वृक्षः भारतवर्षस्य वैशिष्ट्यम् अस्ति। वेदपूर्वकालतः एषः वृक्षः पूजनीयः। सन्तानप्राप्त्यर्थम् नष्टवस्तुनः पुनः प्राप्त्यर्थम् अस्य परितः प्रदक्षिणा कर्तव्याः। एषः वृक्षः नित्यपरिवर्तनशीलः विद्यते। सः वातारणस्य शुद्धिं करोति। एषः तस्य गुणः पूर्वजैः ज्ञातः अतः एव सः पवित्रवृक्षः इति तैः मतम्। विषमज्वरः कृमिः इत्यादि समस्यानां कृते एषः वृक्षः उपयुक्तः। वटवृक्षं इव

मन्त्रः ---

बृहस्पतिः प्रथमं जायमानः। तिथ्यं नक्षत्रमभिसंबभूव।।
श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशौ नु सर्वा अभ्यं नो अस्तु।।
तिष्यः पुरस्तादुत मध्यतो नः। बृहस्पतिर्नः परिपातु पश्चात्।।
बाधेतु द्वेषा अभयं कृणुतां। सुवीर्यस्य पतयः स्याम।।

**आश्लेषानक्षत्रस्य शमनोपायाः ---**

देवता :--- अस्य देवता सर्पः।

कश्यपऋषेः तथा कद्रोः सन्ततिः नाम सर्पसन्ततिः। तेषु प्रमुखाः नव सर्पाः। तस्य नामानि संति -- अनन्तः , वासुकिः, शेषः, पद्मनाभः, कम्बलः, शंखपालः, धृमराष्ट्रः, तक्षकः तथा कालिय इति। कर्कोटिकः पद्मः, महापद्मः, कुलिकः कपिलः, अधरः, इति केचन अपराः अपि सर्पवेगेषु अन्तर्भूताः। एतेषां मध्ये अनन्तः वासुकिः, शेषः इत्यादि सर्पाः देवमानवानां कृते अनुकूलाः तथा च ते सोम्याः अपि।

नक्षत्रमन्त्रः -- ॐ अनन्तनागाय नमः।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः नागचम्पकः। सः कोकण-प्रान्ते तथा कर्णाटक प्रान्ते दरीदृश्यते।

मन्त्रः ---

इदं सर्पेभ्यो हविरस्तु जुष्टं। आश्रेया येषामनुयंति चेतः।।
ये अंतरिक्षं पृथिवीं क्षियंति। ते नः सर्पासो हवमागमिष्ठाः।।
ये रोचने सूर्यस्यापि सर्पाः। ये दविं देवीमनुसंचरति।।
येषामाश्रेषा अनुयंति काम। तीयः सर्पेभ्यो मधुमज्जुहोमि।।
सर्पेभ्यः स्वाहाश्रेषाभ्यःस्वाहा। दंदशूकेभ्यः स्वाहा।।

**मघानक्षत्रस्य शमनोपायाः ---**

देवता :--- अस्य देवता पितरः। मृतमनुष्याय एकवर्षानन्तरं पितरत्वं लभते। देवासुरैः सह ये पितराः ब्रह्मदेवेन निर्मिताः। वेदेषु

देवपितरेभ्यः देवतासमूहं इव मान्यता अस्ति। अतः एते देवपितराः मघा नक्षत्रस्य देवताः। कालिका, वराह, ब्रह्माण्ड, वायु आदि पुराणेषु देवपितराणां वर्णनम् अस्ति। अथर्ववेदेन अमृत पितृगणस्य देवतायाः स्थानं दत्तम्। मनुस्मृत्यानुसारेण पितराणां जन्मः ऋषितः जातः ते देवानां तथा मनुष्यजातकस्य च जनकाः पितराः उपासकनां रक्षणं कुर्वन्ति।

नक्षत्रमन्त्रः --- ॐ पितेभ्यो नमः।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः वटवृक्षः। अस्य वृक्षस्य वैशिष्ट्यं जटाः। एता जटाः भूमौ गच्छन्ति तस्याः नूतनाः वृक्षाः भवन्ति। सहस्रजनाधिकं अस्य छायायां उपविशतुं पारयन्ति। सहस्रवर्षाणि अपि जीवन्ति। संस्कृतभाषायां एषः वृक्षः न्यग्रोधः इति नाम्ना प्रसिद्धः। प्रलयकाले अस्य पर्णस्य शय्यां कृत्वा विष्णुः बालरूपेण शयनं करोति। ब्रह्मइेवः वटवृक्षे निवसति। वटपौर्णिमावस्या दिवसे विटेनसह ब्रह्मसावित्र्याः सौभाग्याय पूजा क्रियते।

मन्त्र :---

उपहृताः पितरो ये मघासु। मनोजवसः सुकृतः सुकृत्याः।
ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं जुपतां।।
ये अग्निदग्धा येऽग्निदग्धाः। येऽमूलोकं पितरः क्षियंति।।
या श्व विद्य या उचन प्रविद्य। मघासु यज्ञ सुकृतं जुषतां।।
पितृभ्यः स्वाहामघाभ्यः । स्वाहानघाभ्यः स्वाहागदाभ्यः।।

**पूर्वाफाल्गुनीनक्षत्रस्य शमनोपायाः ---**

देवता :--- अस्य देवता नाम भगः। भगः नाम ऐश्वर्यम्। अतः यः ऐश्वर्यान् एकादश रुद्रेषु सः दशम्ः। भगः नामकः एक वैदिकदेवता अपि देवता। अदितेः एषः पुत्रः उग्रः जयशीलः अस्ति तथा सम्पूर्ण जगत् धारयति। ऋग्वेदे भगदेवतायाः कृते एकः सूक्तं वर्तते।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः पलाशः अथवा ब्रह्मवृक्षः। हवनेषु या समिधः ताः पलाशवृक्षस्य सन्ति। पलाशः ब्रह्मतेजसस्य प्रतीकः अतएव उपनयपसंस्कारसमये वटोः हस्ते पलाशण्डः एव दीयते। श्वेतपुष्पपलाशः तथा च रक्तपुश्पपलाशः एतौ द्वौ प्रकारकौ पलाशः भवति। पलाशस् बाजानि कफ तथा कृमिनाशकानि, ज्वरनाशकानि, दाहकानि तथा कफपित्तनाशकानि सन्ति।

मन्त्रः ---

गवां पतिः फल्गुनीनामसित्वं। तदर्यमन्वरुणामित्र।।

तं त्वा वय सनितार सनीनां। जीवा जीवंतमुपसंविशेषम्।।

येनेमा विश्वा भुवनानि संजिता। यस्य देवा अनुसंयंति चेतः।।

अर्यमा राजाजरस्तुविष्मान्। फाल्गुनीनामृषभो रोरवीति।।

अर्यम्णेस्वाहाफल्गुनीभ्या स्वाहा। पशुभ्यः स्वाहा।।

**उत्तराफाल्गुनीनक्षत्रस्य शमनोपायाः ----**

देवताः ---

अस्य देवता अर्यमा अस्ति। द्वादश आदित्येषु अर्यमा एका देवता। सा वैदिकदेवता अस्ति। मित्र वरुणाभ्यां सह अर्यमाया: उल्लेख: कृत: वर्तते। मत्स्यपुराणानुसारेण गृहनिर्माणकाले अर्यमाया: पूजा कर्तव्या। यदा यम: अनुपस्थित: वर्तते तदा अर्यमादेवेन यमस्याधिकार: रक्षित:।

नक्षत्रस्य वृक्ष: ---

अस्य नक्षत्रस्य वृक्ष: प्लक्षवृक्ष:। अस्य छाया घना तथा शीतलता वर्तते। अस्य फलानि बालका: बहु आनन्देन खादन्ति। एष: व्रणनाशक: तथा योनिदोषनिवारक: भवति। अस्य उपयोग: दाह, पित्त, कफ, रक्तदोष इत्यादि समस्यानां कृते भवति। अस्य वक्षस्य फलानि पिप्पलिफलानि इव भवति।

नक्षत्रमन्त्र: --- ॐ अर्यम्णे नम:।

मन्त्र: ---

श्रेष्ठौ देवानां भगवो भगासि। तत्वा विदु: फल्गुनीस्तस्य वित्तात।।
अस्मभ्यं क्षत्रमजर सुवीर्य। गोमदश्वदुपसंनुदेह।।
भगोह दाता भग इत्प्रदाता। भगो देवी: फल्गुनीरविवेश।।
भगस्येत प्रसवंगमेम । यत्र देवै: संघमादं मदेम।
भगायस्वाहाफल्गुनीभ्या स्वाहा। श्रेष्ठायस्वाहा।।

**हस्तनक्षत्रक्ष्य शमनोपाया: ---**

देवता :---

अस्य नक्षत्रस्य देवता सूर्य: अस्ति। ऋग्वेदे सूर्यवर्णनं उपलभ्यते। सूर्य-मित्र-वरुण अग्ने: नत्र: अर्थात मार्गदर्शक:। सम्पूर्ण जगति अस्य

दृष्टिः वर्तते। सः सृष्टस्य आत्मा एव। हृदयरोगस्य कुष्ठरोगस्य, दुःखस्वपनानां च एषः नाशः करोति। सम्पूर्ण सृष्टेः उदयानन्तरम् अस्तपर्यन्तम् अस्य प्रभावः विद्यते। द्वादशादितयानाम् सूर्यदेवतायाः रूपाणि इति रामायणस्य मतम्। उषा, प्रत्यूषा, संज्ञा, तथा छाया इत्यादयाः सूर्यस्य भार्या। सप्तमीतिथ्यां तथा रविवासरे सूर्यस्य स्वामित्वं वर्तते। रविवासरे यावत् सप्तमीतिथि वर्तते तावत् भानुसप्तमीव्रतं क्रीयते। नक्षत्रमंत्रः -- ॐ श्री सवितृसूर्यनारायणाय नमः।

**नक्षत्रस्य वृक्षः ---**

अस्य नक्षत्रस्य वनस्पतिः मल्लिका। हिन्दीभाषायाम् अस्य नाम चमेली इति वर्तते। अस्याः मूलं पूर्णं, फलिका तथा फलं भेषजगुणयुक्तानि सन्ति। तेषां उपयोगः मुखरोगः, नेत्ररोगः, इत्यादि समस्यानां कृते भवति। कुष्ठ इतयादि रोगानां समस्यानिवारणाय अस्याः पर्णानां मूलस्य वा लेपनं क्रीयते। अस्य वृक्षः विशालः भवति। श

मन्त्रः ---

आयातु देवः सवितोपयातु। हिरण्ययेन सुवृता रथेन।
वहन्हस्त सुभगं विद्‌भनापसं। प्रयच्छंतं पपुरि पुण्यमच्छ।।
हस्तः प्रयच्छत्वमृतं वसीयः। दक्षिणेन प्रतिगृभ्णीम् एनत्।।
दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवति यज्ञं।।

सवित्रेस्वाहाहस्ताय।स्वाहाददतेस्वाहापृणते।।
स्वाहाप्रयच्छतेस्वाहाप्रतिगृभ्णतेस्वाहा।।

**चित्रानक्षत्रस्य शमनोपायाः ---**

देवता :---

अस्य नक्षत्रस्य देवता त्वष्टा। एषः विश्वरचनायां कुशलः। एतेन इन्द्रस्य कृते चमसपात्रानां निर्मितिः कृता। सः गर्भाशये वर्तमानाय गर्भाय विकासयित्वा मनुष्येभ्यः पशुभ्यः च सुनुशितां आकृतिं यच्छति। पुराणेषु सः सूर्यस्य तथा प्रजापतेः रूपम् इति मतम्। अयं देवता वेदकालेषु विश्वकर्मा इति नाम्ना प्रसिद्धा आसीत्। अस्य कन्यायाः संज्ञायाः विवाहः विवस्वान् आदित्येन सह जातः।

नक्षत्रमन्त्रः --- ॐ त्वष्ट्र नमः / ॐ विश्वकर्मणे नमः।

नक्षत्रस्यवृक्षः ---

अस्य नक्षत्रस्य वृक्षः बिल्वः अस्ति। अस्य फलस्य उपयोगः हृदयरोगस् कृते कफदोषस्य कृते च भवति। अस्य पक्वं फलं शीतलं भवति। बिल्वस्य मूलं प्रसिद्धेषु दशमूलेष एकम्। संस्कृतभाषायां बिल्ववृक्षः 'श्रीवृक्षेः' इति नाम्ना प्रसिद्धः। श्रीसूक्ते श्रीवृक्षः नाम बिल्ववृक्षः। अस्य वृक्षस्य पर्णानां चूर्णस्य सेवितं चेत् ज्वरः शीघ्रतया न्यूनतां याति।बिल्वमूलम् वातपित्तव्याधीनाम् कृते निद्रानाशसमस्याः कृते अतीव उपयुक्तम्। बिल्ववृक्षः भारतवर्षे सर्वत्र दृश्यते। एषः कफवातपित्त तथा विषनाशकः अपि अस्ति।

मन्त्रः ---

त्वष्टा नक्षत्रमभ्येति चित्रां। सुभं ससं युवति रोचमानां।।
निवेशयन्नमृतान्मर्त्यांश्च। रूपाणि पिंशन्भुवनानि विश्वा।।
तन्नस्त्वष्टा तदु चित्रा विचष्टां। तन्नक्षत्रं भूरिदा अस्तु मह्यं।।

तन्नः प्रजां वीरवती ँ्सनोतु। गोभिनों अश्वै समनक्तु यज्ञं।।

त्वष्टेस्वाहाचित्रायैस्वाहा। चैत्रयस्वाहाप्रजायैस्वाहा।।

**स्वातिनक्षत्रस्य शमनोपाया: ---**

देवता :---

अस्य नक्षत्रस्य देवता वायुः अस्ति। विश्वपुरुषस्य श्वासतः वायोः उत्पत्तिः अभवत्। ऋग्वेदे अस्य वर्णनपराणि षट्सूक्तानि वर्तन्ते। इन्द्रेण तथा मित्रेण सह अस्य सख्यं वर्तते। विष्णुधर्मेत्तरपुराणे वायोः मूर्तिः कथं निर्मीयते तद् विषये वर्णनं अस्ति। जीवनस्य अनेकरूपाणि वायुः उत्पादयति। सम्पूर्ण जीवनं वायुना एव भवति। समानवायुः नाभिप्रदेशे स्थित्वा अन्नपाचनं करोति। उदानवायुः कण्ठदेशे वर्तते तथा अन्नग्रहणं करोति।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः अर्जुनः। सः श्वेतपुष्पाणि धारयति। अजुर्नवृक्षस्य वल्कलानां उपयोगः जीर्णज्वरः, वातरोगाः इत्यादि समस्यानां कृते भवति। अर्जनवृक्षस्य उपयोगः केशरक्तवाहिनीना बलं वर्धयितुं भवति। पूजासमये अर्जनवृक्षः यदि अनुपलब्धः तर्हिः तुलसीवृक्षः आराध्यः अस्ति। तुलसी कफपित्त अतिसेवनं पित्तकरं भवति। तुलसीवृक्षः आरध्यवृक्षः अस्ति। विभिन्नपूजासमये पंचामृते तुलसीपत्रं उपयोगी भवति।

नक्षत्रमन्त्रः --- ॐ वायवे नमः।

वैदिकमन्त्र :---

वायुर्नक्षत्रमभ्येति निष्ट्यां। तिग्मशृंगो वृषभो रोरुवाणः।।
समीरयन्नन्भुवना मातरिश्वा। अप द्वेषाँसि नुदतामरातीः।।
तन्नो वायुस्तदु निष्ट्यां शृणोतु। दन्नक्षत्रं भूरिदा अस्तु मह्यं।।
तन्नो देवासो अनुजानंतु कामं। यथा तरेम दुरितानि विश्वा।।
वायवेस्वाहानिष्टयायैस्वाहा। कामचारायस्वाहाभिजितयैस्वाहा।।

**विशाखानक्षत्रस्य शमनोपायाः ---**

देवताः --

एषा द्वंद्वदेवता अस्ति। मेघामिथि काण्वऋषिणां यज्ञस्य कृते अस्याः देवतायाः आवाहनं कृतम् तथा राक्षसाः दण्डनीयाः लोकसमुदायस्य रक्षणं च कर्तव्यम् सर्वेः सुखिनः भवन्तु अतः ऋषिभिः तथा देवता प्रार्थयते।

**नक्षत्रस्यवृक्षः ----**

विशाखानक्षत्रस्य वृक्षः नागकेशरः अस्ति। तन्त्रराज तथा निघण्टु ग्रन्थानुसारं विकंकतवृक्षः विशाखा नक्षत्रस्य वृक्षः अस्ति। अयं वृक्षः कोकणप्रदेशे प्राप्यन्ते। अस्य पुष्पाणि श्वेतपीतहरितानि तथा फलानि रक्तवर्णानि भवति। अयं वृक्षः भारतवर्षे सर्वत्र दृश्यते। पर्णानां चूर्णं कफपित्तवातनाशकं भवति।

वैदिकमन्त्रः ---

दूरमस्वच्छत्रवो यंतु भीताः। तदिंद्राग्नी कृणुतां तद्विशाखे।।
तन्नो देवा अनुमदंतु यज्ञं। पश्चात्पुरस्तादभयं नो अस्तु।।
नक्षत्राणामधिपत्नी विशाखे। श्रेष्ठाविद्राग्नी भुवनस्य गोपौ।।

**अनुराधानक्षत्रस्य शमनोपाया: ---**

देवता :---

अनुराधानक्षत्रस्य देवता मित्र: अस्ति। मित्रं नाम सुहृद स्नेही अस्ति। य: मृत्युभयं नश्यति स: मित्र: इति यास्केन कृतं मित्रं लक्षणं वर्तते। ऋग्वेदस्य मित्रसूक्ते तस्य वणर्न अस्ति।

नक्षत्रमन्त्र: --- ॐ मित्राय नम:।

नक्षत्रस्य वृक्ष: ---

अस्य नक्षत्रस्य वृक्ष: बकुलवृक्ष: अस्ति। अमराकोशे बकुलवृक्ष: नाम केसलवृक्ष: इति उक्तम् अस्ति। अस्य पुष्पाणां सुगन्ध: हृदयस्य कृते उपयुक्त:। दन्तरोगाय अस्य वृक्षस्य पुष्पाणि, फलानि च उपयुक्तानि भवन्ति। अस्य कृमिघ्नवल्कलानां सहायेन यदि दन्तधामञ्जनं क्रीयते दन्ता: अधिका: बलवन्ता: भवन्ति। अयं वृक्ष: श्वेत तथा पीत द्वौ प्रकारकौ भवति।

मन्त्र: ----

ऋध्या स्म हव्यैर्नमयोप सद्य। मित्रं देवं मित्रधेयं नो अस्तु।।
अनुराधान्हविषा वर्धयत:। शतं जीविम शरद: सवीरा:।।
चित्रं नक्षत्रमुदागात्पुरस्तात्। अनुराधास इति यद्वदंति।।
तन्मित्रं एति पथिभिर्देवयानै:। हिरण्यर्विततैरंतिरिक्षे।।
मित्रायस्वाहानूराधेभ्य: स्वाहा। मित्रधेयायस्वाहाभिजित्यैस्वाहा।।

**ज्येष्ठानक्षत्रस्य शमनोपाया: ---**

देवता :---

अस्य नक्षत्रस्य देवता इन्द्रः अस्ति। ऋग्वेदे सर्वाधिकसूक्तानि इन्द्रस्यकते वर्तते। पृथ्वीआकाशयो मध्ये यद् अन्तरिक्षं वर्तते तस्य स्वामिनः। अयं देवता आर्यमाणां पराक्रमी देवः अस्ति। तेन दुर्जनानां शासनं कृतम् तथा सज्जनानां रक्षणमपि कृतम्। सः गौरवर्णः, सुन्दरः तीक्ष्णबुद्धिमान, उदारः तथा धनदाता अस्ति। द्वादशादित्येभ्यः इन्द्रः एकादशः।

नक्षत्रमन्त्रः --- ॐ इन्द्रयः नमः।

नक्षत्रस्यवृक्षः ---

ज्येष्ठानक्षत्रस्य वृक्षः शाल्मलिवृक्षः। अयं वृक्षः अरुण, श्वेत तथा तिक्त एते त्रिप्रकाराः भवन्ति। अस्य पुष्पाणि, फलानि, मूलानि च सर्वमेव औषधीगुणयुक्तं वर्तते। अस्य पुष्पाणि वातपित्तकफनाशकानि भवति।

मन्त्रः ---

इंद्रो ज्येष्ठामनु नक्षत्रमेति। यस्मिन्वृत्रं वृत्रतूर्ये ततार।।
तस्मिन्वयममृतं दुहानाः। क्षुधं तरेम् दुरितं दुरिष्टं।।
इंद्रायस्वाहाज्येष्ठायैस्वाहा।ज्येष्ठयायस्वाहाभिजित्यैस्वाहा।।

**मूलनक्षत्रस्य शमनोपायाः ---**

अस्य नक्षत्रस्य देवता निर्ऋतिः। ऋग्वेदस्य दशममण्डले नवपंचदशतमे सूक्ते प्रथमऋचि एव निर्ऋतिः उल्लेखः वर्तते। शब्दकोशेषु निर्ऋति इति अस्य शब्दस्य अर्थाः मृत्युदेवता नाशः, हानिः, आपत्तिः इति संति। एषां पापदेवता इति अपिमतमस्ति। अस्य पूजनेन राक्षसपिशाचेन संरक्षणं भवति एवं कलिकापुराणे उक्तम्।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः शालवृक्षः अस्ति। अयं वृक्षः कफपित्तनाशकं भवति। अयं वृक्षः भारते सर्वत्र दृश्यते। अस्य वृक्षस्य फलेषु कषायद्रव्यं वर्तते। अस्य वृक्षस्य वल्कलानि कफनाशकानि सन्ति।

वैदिकमन्त्रः ---

मूलं प्रजां वीरवतीं विदेय। पराच्येत निर्ऋतिः पराचा।।
गोभिर्नक्षत्रं पशुभिः समक्तं। अहभूर्याद्यजमानाय मह्यं।।
अहर्नो अद्य सुविते दधातु। मूलं नक्षत्रमिति यद्वदंति।।

**पूर्वाषाढानक्षत्रस्य शमनोपायाः ---**

अस्य नक्षत्रस्य देवता आपः अस्ति। अस्य शब्दस्य प्रयोगः वेदेषु जलं, नदी इति अर्थेन अपि प्रयुक्तम् भवति। ऋग्वेदे अस्य चत्वारि सूक्तानि संति। आपः, शुद्धाः, मधुरा तथा सर्वरोगनिवारकाः अस्ति। आपः एव सृष्टे स्थानम्।

नक्षत्रस्य वृक्षः ---

अस्य वृक्षस्य वृक्षः वंजुलः। सागरतटे अस्य वनानि दृश्यन्ते। जलदेवतायाः आश्रयेन वर्धमाना एषा वनस्पतिः शीतलयुक्ता भवति। अयं वृक्षः पित्तनिवारणाय उपयुक्तानि। अस्य फलानि कफपित्तनाशकानि वर्तन्ते।

वैदिकमन्त्रः ---

या दिव्या आपः पयसा संबभूवुः। या अंतरिक्ष उत पृथिवीर्याः।।

यासामषाढा अनुयंति कामं। ता न आपः शँस्योना भवंतु।।

याश्च कूप्या याश्च नाद्याः समुद्रियाः।याश्च वैशंतीरुत प्रासचीर्याः।

**उत्तराषाढानक्षत्रस्य शमनोपायाः ---**

अस्य नक्षत्रस्य देवता विश्वेदेवाः अस्ति। ऋग्वेदे चत्वारिंशतरनि सूक्तानि एतेषां कृते संति। विश्वेदेवाः सर्वदेवानां प्रतिनिधित्वं कुर्वन्ति। वायुपुराणे दशदेवतानां समूहे विश्वदेवाः इति मतः। वैश्वदेवः नाम पञ्महायज्ञेषु वर्तमानः एकः देवयज्ञः नाम एतद् नित्यकर्मम्। विश्वदेवाः नाम एका यज्ञीया देवता इति। वैश्वदेव यज्ञे विश्वदेवानां कृते आहुतिः वर्तते।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः पनसवृक्षः अस्ति। अस्य फलं अतीव पुष्टिकरं भवति। अस् बींज वातपित्तकफनाशकं भवति।

नक्षत्रमन्त्रः --- ॐ विश्वेभ्यो देवेभ्यो नमः।

वैदिकमन्त्रः ---

तन्नो विश्वे उपश्रृण्वंतु देवाः। तदषाढा अभिसंयुंतं यज्ञं।।

तन्नक्षत्रं प्रथतां पशुभ्यः। कृषिर्वृष्टिर्यजमानाय कल्पतां।।

विश्वेभ्योदेवेभ्यः स्वाहाषाढाभ्य:स्वाहा। अनपजय्यायस्वाहाजित्यैस्वाहा।

**श्रवणनक्षत्रस्य शमनोपायाः ---**

अस्य देवता विष्णुः। विष्णुः विश्वस्य प्रतिपालकः तथा इन्द्रस्य मित्रम् अस्ति। ऋग्वेदे विष्णोः स्तुतिपराणि त्रीणि सूक्तानि सन्ति। देवपूजायां विष्णोः स्थानं प्रथमं वर्तते। महाभारतस्य शान्तिपर्वे व्यासमहर्षिणा विष्णुसहस्रनाम इति स्त्रोतस्य रचनां कृत्वा विष्णु–माहात्म्यं वर्णितम्। अष्टादशपुराणेषु पञ्चपुराणानि विष्णुदेवतायाः सन्ति।

नक्षत्रमन्त्रः -- ॐ नमो भगवते वासुदेवाय / ॐ विष्णवे नमः।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः अर्कवृक्षः अस्ति। श्वेतअर्काय मन्दारः इति अपि उच्यते। गणपतये तथा हनुमानाय अस्य पुष्पाणि रोचन्ते। एषा हवनीया वनस्पतिः। अस्य पर्णमूलपुष्पाणि विविधेषु भेषजेषु उपयुज्यन्ते।

वैदिकमन्त्रः ---

शृण्वंति श्रोणाममृतस्य गोपां। पुण्यामस्या उपश्रृणोमि वाचं।।

महीं देवीं विष्णुपत्नीमूजर्यां। प्रतीचीमेनाँ हविषां यजामः।।

त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमंतरिक्षं।।

विष्णवेस्वाहाश्रोणायैस्वाहा। श्लोकायस्वाहाश्रुतायस्वहा।।

**धनिष्ठानक्षत्रस्य शमनोपायाः ---**

अस्य नक्षत्रस्य देवता गन्धर्व अथवा वसुः इति। वसुः नामकः एकः देवतासमूहः अपि अस्ति। एषः अष्टदेवतायाः समूहः भागवते

द्रोण:, प्राण:, ध्रुव:, अर्क:, अग्नि:, दोष:, वसु: विभावसु: च एते अष्टवसु: वर्णिता सन्ति। ऐष्वर्यप्राप्त्यर्थम् वसूनां पूजा अवश्यमेव कर्तव्या इति भागवते उक्तम्।

नक्षत्रस्य वृक्ष: ---

अस्य नक्षत्रस्य वृक्ष: शमीवृक्ष: अस्ति। एष: हवनीय: वृक्ष:। अस्य वृक्षस्य समिध: यज्ञे उपयुज्यन्ते। ग्रहयज्ञे शनिग्रहाय शमीवृक्षस्य समिधानां आहुति: दीयते। अस्य उपयोग: दारु यज्ञे अग्निनिर्माणार्थे उपयुज्यते अत: अस्य नाम अग्निगर्भा इति। प्राचीनकालत: अयं वृक्ष: पवित्रं मन्यते। गणेशाय अयं वृक्ष: अतीव रोचन्ते।

वैदिकमन्त्र: ---

अष्टौ देवा वसव: सोमयास:। चतस्रो देवीरजरा: श्रविष्ठा:।।

ते यज्ञं पांतु रजस: परस्तात्। संवत्सरीणाममृतं स्वस्ति।।

यज्ञं न पातुं वसव: पुरस्तात्। दक्षिणतो भियंतु श्रविष्ठा:।।

वसुभ्या:स्वाहाश्रविष्ठाभ्य:स्वाहा। अग्रायस्वाहापरीत्यैस्वाहा।।

**शततारानक्षत्रस्य शमनोपाया: ---**

अस्य नक्षत्रस्य देवता वरुण: अस्ति। अयं देवता सामर्थ्यसम्पन्ना अस्ति। येन निर्मिता: नियमा: सर्वदेवानां कृते अपि बन्धनकारका: स: वरुणदेव तारकानां सहाय्येन जगद्-व्यवहाराणां निरीक्षणं करोति। देवपूजायां, पुण्याहवाचनादि शुभविधिषु तथा कलशपूजनस्य समये वरुणाय आवाहनं क्रीयते। वरुण: पश्चिमदिशायां स्वामी अपि वर्तते।

नक्षत्रमन्त्र: --- ॐ वरुणाय नम:।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः कदम्बवृक्षः। अस्य अन्यानि नामानि अपि सन्ति। अस्य पुष्पाणि सुगन्धयुक्तानि सन्ति। अस्य वल्कलं शक्तवर्धकं, ज्वरनाशकं वर्तते। कदम्बस्य जलकदम्बस्य तथा स्थलकदम्बस्य एतौ द्वौ प्रकारकौ संति। हिन्दू तथा बौद्धाः कदम्बाय वन्दनीयः मन्यते।

वैदिकमन्त्रः ---

क्षत्रस्य राजा वरुणोधिराजः। नक्षत्राणाँ शतभिषग्वसिष्ठः।।

तौ देवेभ्यः कृणुतो दीर्घमायुः। शतँ सहस्रा भेषजानिधत्तः।।

वरुणायास्वाहाशतभिषजेस्वाहा। भेषजेभ्यःस्वाहा।।

पूर्वाभाद्रपदानक्षत्रस्य शमनोपायाः ---

पूर्वाभाद्रपदानक्षत्रस्य देवता नाम अजैकपादः। संशोधकमतानुसारेण मेघमण्डले दृश्यमाना विद्युतलता एव अजैकपाद इति। अस्या देवतायाः सम्बन्धः अहिर्बुधन्य देवतया सह विद्यते। महाभारतस्य आदिपर्वे तथा शान्तिपर्वे अपि प्रकाशरुद्राणां नामानि सन्ति।

नक्षत्रस्य वृक्षः ---

पूर्वाभाद्रपदानक्षत्रस्य वृक्षः आम्रवृक्षः अस्ति। अस्य वृक्षस्य फलः फलानां राजा अपि कथ्यते। सः अग्निवर्धकः अतः तस्य सेवनं कदापि क्षुधासमये न कारयति। अस्य वृक्षस्य वल्कल-मज्जिरमूलानि सर्वमेव कफपित्तनाशकं भवति।

वैदिकमन्त्रः ---

अज एकपादुदगात्पुरस्तात्। विश्वा भूतानि प्रति मोदमनः।।

तस्य देवाः प्रसवं यंति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः।।

विभ्राजमानः समिधा न उग्रः। आंतरिक्ष मरुहदगंद्यां।।

अजैयकपदेस्वाहाप्रोष्ठपादीयःस्वाहा।।

तेजसेस्वाहाब्रह्मवर्चसायस्वाहा।।

**उत्तराभाद्रपदानक्षत्रस्य शमनोपायाः ---**

अस्य नक्षत्रस्य देवता अहिर्बुधन्यः। ऋग्वेदे 70-72 ऋक्षु अस्याः देवतायाः वर्णनं वर्तते। महाभारते ईकदशरुद्रेषु अस्याः समावेशः कृतः वर्तते। वैदिकवाङ्मये 'अहि-बुधन्यदेवतायाः सम्बन्धः गार्हपत्य अग्निना सह वर्तते। महादेवस्य प्रसादतः सुरभी-कश्यपाय अहिर्बुधन्यः नामकः पुत्रः जातः। उत्तराभाद्रपदा नक्षत्रे सूर्यचन्द्रावरुणरुद्रविष्णवोः तथा अहिर्बुध्न्यस्य पूजा समृद्धयर्थं क्रीयते।

नक्षत्रमन्त्रः --- ॐ अहिर्बुध्न्याय नमः।

नक्षत्रस्यवृक्षः ---

अस्य नक्षत्रस्य वृक्षः नाम परिभद्रवृक्षः। आयुर्वेदे परिभद्रः नाम वर्णनम् अस्ति। अस्य सर्वांगानां उपयोगः रोगनिवारणाय भवति। क्षेत्रे यदि परिभद्रस्य रोपणं क्रियते तर्हि भूम्याः सफलता वर्धते।

वैदिकमन्त्रः --

अहिर्बुधिन्यः प्रथमान एति। श्रेष्ठो देवनामुत मानुषाणां।

तं ब्राह्मणाः सौमपाः सोमपासः। प्रोष्ठपदासौ अभिरक्षंति सर्वे।।

चत्वार एकमभिकर्मदेवाः। प्रोष्ठपदास इति यान्वदंति।।

**रेवतीनक्षत्रस्य शमनोपायाः ---**

अस्य देवता पूषन्। यः संरक्षणं करोति, समृद्धिं यच्छति सः पूषा। ऋग्वेदे अष्टसूक्तेषु अस्य वर्णनं अस्ति। सः शक्तिपालकः, पशूनां मित्रं, पशुधनं रक्षयति वर्धयति च नष्टपशूनां पुनः प्राप्त्यर्थम् सः सहायं करोति।

नक्षत्रस्य वृक्षः ---

अस्य नक्षत्रस्य वृक्षः मधुकवृखः। एषः वृक्षः सर्वत्र दृश्यते। अस्य पुष्पाणि मधूनि तथा अतीव शीतलानि भवति। अस्य बीजतः तैलं लभ्यते। अस्य तैलेन शरीरमर्दनं वेदनाः हरति।

वैदिकमन्त्रः ---

पूषा रेवत्यन्वेति पंथां। पुष्टिपती पशुपावाजबस्त्यौ।

इमानि हव्या प्रयता जुषाणा। सुगैनो यानैरूप्यातां यज्ञं।।

# 5. पुराणेषु योगः, करणतिथ्यादीनां कर्मकाण्डीयशमनोपायश्च

ज्योतिषशास्त्रे अनेकाः योगाः सन्ति। अत्र योगस्यव्युत्पत्तिः, योगशब्दस्यार्थः योगशब्दस्य लक्षणमादिनाम् विवेचनं अधोलिखितमस्ति।

**योगशब्दस्य व्युत्पत्तिः ---**

युजिरयोगे धातोः घञ् प्रत्यय भूत्वा योगः शब्दः निष्पन्नो भवति।

**योगशब्दस्यार्थः --**

सामान्यरूपेण योगशब्दस्यार्थ भवति संयुक्तः। अस्यापरोऽर्थः संगतिः युक्तिः वा। अत्र ज्योतिषाधारेण योगस्यार्थः सम्मीलनम् भवति। संस्कृत वाङ्मये योगशब्दस्य प्रयोगः बाहुल्येन प्राप्यते। यथा मनुस्मृतौ --

योगसाधनविक्रीतं योगदानं प्रतिग्रहम्।
यत्र वाऽप्युपधि पश्येत्सर्वं विनिवर्तयेत।।[1]

अत्र योग शब्दः छलवाचीरूपेण प्रयोगो जातः। अतः योगशब्दस्य अपरो अर्थः छलापि भवति। योगशब्दस्य प्रयोगः दर्शने एवं उपनिषद् ग्रन्थेऽपि प्राप्तं भवति। तद्यथा --

योगश्चित्तवृत्तिनिरोधः।[2]

---

1.मनु. 8/165

2.पाणिनि योगसूत्र - 2

अत्र योगशब्दस्य प्रयोगः चित्तस्यनिरोधरूपेण कृतमस्ति। उपनिषद् ग्रन्थे योगस्य वर्णनं ईदृशं वर्णनं अस्ति --

तां योगमिति मन्यते स्थिरामिन्द्रियधारणम्।
अप्रमतस्तदा भवति योगो हि प्रभावाव्ययौ।।[1]

अत्र योग शब्दस्य प्रयोगः इन्द्रियं स्थिरः करणार्थे कृतमस्ति। अस्यापरार्थापि निम्नाः सन्ति --

गम्भीरभावचिन्तनः, मनस्यसंकेन्द्रीकरणः, परमात्माचिन्तनादि।

**योगशब्दस्य लक्षणम् --**

ज्योतिषे विविधानि योगानि सन्ति। परन्तु ग्रहस्थिति अनुसारं जातकानां फलं प्राप्त भवति सः योगः कथ्यते। ज्योतिषसिद्धान्तानुसारं योगस्य महत्वमधिकं विद्यते। सूर्यादिनवग्रहाः जातकानां शरीरे, अंग धात्वादि दोषानां प्रतिनिधित्वं कुर्वन्ति। योगलक्षणमनुदृश्य प्रश्नमार्गः नामकः ग्रन्थेयोगशब्दस्यलक्षणमकथितमस्ति। तद्यथा --

ग्रहाणांसिीति भेदेन
पुरुषान् यांजयन्ति हि।
फलैः कर्मसमुद्भूतैरिति
योगाः प्रकीर्तिताः।।[2]

-----------------------------------------------

1. कठोप. 2/11
2. प्र.मा. 9/48

**योगानां प्रकार:--**

ज्योतिषशास्त्रं विविधविषयपरकं शास्त्रमस्ति। ग्रहाणां कालावस्थागत्यादि निदर्शनं, कर्मसम्पादनिमित्तकमुहूर्तादिकथनेन शुभाशुभफलं कथनमस्यशास्त्रस्य मुख्याशयो: वर्तते। ज्योतिषशास्त्रे सहस्राधिका योगा: सन्तीति- अनुमीयते च।

ग्रहयोगं ज्योतिषशास्त्रस्य भाषायां ''योग:'' कथ्यते। मुख्यरूपेण ग्रह-राशि भावस्याधारोपरि विविधप्रकारका: भेदसंयुक्ते योगा: विविधप्रकारका: भवन्ति। यथा --

1. ग्रहजनितयोग:
2. राशिजनितयोग:
3. भावजनितयोग:
4. राशि-भाव-ग्रहजनितयोग:
5. भाव-ग्रहजनितयोग:।

**विशिष्ट योगानां नामानि :---**

ज्योतिषे अनेके योगा: सन्ति। परन्तु अत्र ये ये प्रमुखा: योगा: सन्ति तेषांनामान्येव प्रस्तूयते मया तद्यथा --

1. रुचकयोग:
2. भद्रयोग:
3. हंसयोग:
4. मालव्ययोग:
5. भास्करयोग:

6. इन्द्रयोगः
7. मरुतयोगः
8. सुनफायोगः
9. अनफायोगः
10. दुर्धरायोगः
11. धुरन्धरायोगः
12. गजकेसरीयोगः
13. पर्वतयोगः
14. मालिकायोगः
15. सार्वभौमराजयोगः
16. महाराजधिरायोगः
17. सिंहासनयोगः
18. चतुश्चक्रयोगः
19. एकावलीयोगः
20. कुबेरतुल्यराजयोगः
21. श्रीछत्रयोगः
22. शत्रुजितराजयोगः
23. फणियोगः
24. नारीराजयोगः
25. पञ्चमहापुरुषयोगः
26. राजराजेश्वरयोगः
27. प्रशान्तराजयोगः
28. पुष्कलराजयोगः
29. भेरीयोगः

30. श्रीनाथयोग:
31. लक्ष्मीयोग:
32. चण्डिकायोग:
33. मुकुटयोग:
34. देवेन्द्रयोग:

**जन्मकुण्डल्या: योगानुसारेण विविधारोगोत्पत्तिः तथा तस्यशमनोपाया:--**

**नेत्रयोग: ---**

जातकस्य कुण्डल्यां नेत्ररोगस्य अधोनिर्दिष्टकारणापि सन्ति। यथा-- षष्ठेश: यदा वक्रगते: राश्यां गच्छति।

लग्नेश: बुध: यदा, 3, 6 अथवा मङ्गलग्रह: प्रथम वा अष्टमे राश्यां तदा।

शनिमङ्गलग्रहौ यदा द्वितीये अथवा द्वादशे स्थाने वर्तते।

यदा लग्नेशस्योपरि तथा धनेरास्योपरि पापदृष्टि:।

शुक्र: यदा षष्ठ अािवा अष्टमें स्थाने वर्तते तदा दक्षिणनेत्रे रोग: वर्तते।

**उपाय:--** सूर्योपासना तथा तञ्चक्षुमंत्रस्य जप: तथा मन्त्रोपनिषद पाठ:।

**नेत्रघातयोग: ---**

लग्ने यदा 2, 8, 10 स्थानस्य स्वामी शुक्रेण सह वर्तते तदा एष: योग: भवति।

**उपाय:--** सूर्योपासना तथा तञ्चक्षुमंत्रस्य जप: तथा मन्त्रोपनिषद पाठ:।

**अन्धयोग: --**

यदा राहुः , सूर्यः च लग्ने भवति, क्रूरग्रहाः तथा मंगलग्रहः, चन्द्रमा, शनिः, सूर्यः च यदा अनुक्रमेण द्वितीय, षष्ठ, अष्टम, द्वादशस्थानेषु वर्तन्ते तदा एषः रोगः उद्भवति। यदा राहुसूर्यो लग्ने, शनिमङ्गलग्रहौ तदा अस्य योगस्य शक्यता अधिकं वर्तते। अनेन योगेन जातकः दृष्टिहीनः भवति। यथा --

शनिराश्यां सूर्यः सप्तमस्थाने।

कुम्भलग्ने, चन्द्रमा शुक्रः च यदा द्वितीयस्थाने पापग्रहेन सह वर्तते

**क्षयरोगः---**

चन्द्रमा स्थाने यदि राहुः वर्तते तर्हि क्षयरोगः भवति।

शुक्रः तथा लग्नस्य स्वामी षष्ठ, अष्टम, द्वादशस्थाने वर्तते।

सिंहराश्यां अथवा कर्कराश्यां सूर्यः चन्द्रमा च यदा वर्तते तदा क्षयरोगः भवति।

पापग्रहेन सह चन्द्रमा तथा सप्तमे स्थाने शनिः वर्तते तदा।

मङ्गलराश्यां तथा शनेः दृष्टिः लग्नेश वर्तते तदा अपि क्षयरोगः भवति।

**उपायः** -- लग्नेशस्य रत्नस्य परिधानम्, आदित्यहृदयस्य पाठः इत्यादयः।

**वि**शेषरोगीयोगः ---

लग्ने यदि चन्द्रमा लग्नोपरि पापग्रहस्य दृष्टिः तर्हि जातकस्य विशेषः अथवा भयङ्कररोगस्य शक्यता अधिकं वर्तते।

**उपायः--** लग्नेशस्य मनत्रजापः तथा अभिषेकपूर्वकम् अङ्गुलीयकस्य परिधानम्।

**मूकयोगः ---**

द्वितीयेशेन सह गुरुग्रहः यदा अष्टमस्थाने भवति तदा।

बुधः तथा षष्ठग्रहस्य स्वामी यदा लग्ने भवति तदा।

गुरूः तथा षष्ठग्रहस्य स्वामी यदा लग्ने तदा।

धनेशः तथा बृहस्पतिः यदा षष्ठ, अष्टम, द्वादशस्थाने वर्तते तदा।

यदा चन्द्रमा वृषभराश्यां पापग्रहैः सह सन्धिं करोति तदा।

**उपायः** --- वाचस्पतिसूक्तस्य वा सरस्वतीसूक्तस्य पाठम्।

**हकलाहकयोगः ---**

अस्मिन् योगे जातकः सम्यक्तया भाषणं कर्तुम् न शक्नोति। मध्येमध्ये तस्य भाषणं खण्डितं भवति। कर्कवृश्चिकमीनराशेः लग्नेशः यदि बुधः तथा चन्द्रमा क्षीणः भवति तदा एषः योगः उद्भवति तथा जातकः सम्यक्तया वक्तुम् न शक्नोति।

**उपायः** -- वाचस्पतिसूक्तस्य वा सरस्वतीसूक्तस्य पाठम्।

**सभामध्येमूकतायोगः ---**

अस्मिन् योगस्य जातकाः यद्यपि पण्डिताः तर्हि अपि ते सभायां मध्ये सम्यक्तया वक्तुम् न शक्नोति। यदा लग्नेश चतुर्थेश अथवा सप्तमे वर्तते तदा मूकतायोगः भवति।

**रक्तदाबयोगः ---**

चन्द्रक्षेत्रे वर्तमानः म्रगलग्रहः मनुष्याय रक्तदाबं कारयति।

**उपायः** -- सौरसूक्तस्य तथा मन्युसूकारस्य जपः तथा पाठः।

**दन्तरोगः ---**

पापग्रहस्य दृष्टिः अथवा पापग्रहेन सह वृषभराशेः ,मेषराशेः अथवा धनुराशे लग्नं यदि वर्तते तदा एषः रोगः भवति।

सप्तमस्थाने वर्तमानः यः पापग्रहः तस्योपरि शुभग्रहस्य दृष्टिः यदा वर्तते तदा एषः रोगः भवति।

धनेषः तथा षष्ठेशः यदा पापग्रहयुक्तौ।

पच्चमे अथवा लग्ने यदा राहुः वर्तते तदा एषः रोगः भवति।

**उपायः** -- मौक्तिमरत्नपरिधानम्।

**व्यसनयोगः ---**

संसारे बहवः जातकाः यदि व्यसनी भवति तदा व्यसनस्य प्रभावः प्रकृतौ दृश्यते तेन विविधानां रोगानां सम्भावना जायते।

व्ययेशः यदा नीचः वर्तते तदा।

लग्नस्वामी नीचराश्यां अथवा शुक्रग्रहस्य राश्यां वर्तते।

लग्ने यदा मकरराश्यां गुरुः वर्तते।

लग्ने यदा पापग्रहस्य दृष्टिः वर्तते।

**उपायः** --

आत्मबलवर्धनाय आदित्यहृदयस्य पाठः, आत्मबलवर्धनाय सौरसूक्तस्य अथवा मन्युसूक्तस्य पाठः, सूर्ययन्त्रस्य परिधानम्।

**कुष्ठरोगः ---**

लग्नेशः चतुर्थे अथवा द्वादशस्थाने मङ्गलतथा बुधग्रहः मध्ये यदा वर्तते तदा एष रोगः भवति।

षष्टस्थाने शनिः चन्द्रः, गुरु यदा वर्तते तदाऽपि कुष्ठरोगः भवति।

मङ्गलग्रहः तथा शनिः द्वितीये अथवा दशमे स्थाने तथा लग्ने चन्द्रः तथा सप्तमे सूर्यः यदि स्यात तदा श्वेतकुष्ठः जायते।

अष्टमे गुरुः षष्ठे मंगलग्रहः शनिः बुधः लग्ने तथा तेषामुपरि पापग्रहदृष्टिः यदि स्यात तर्हि रक्तकुष्ठ रोगः भवति।

षष्ठेलग्ने सूर्येण सह यदि स्यात तदा रक्तकुष्ठः रोगः भवति।

जलराशिगतेन चन्द्रेण सह शुक्रस्य युतिः यदा भवति तदा श्वेतकुष्ठः जायते।

**उपायः--** आहारे राजमाषदलं, तुषसहितराजमाषस्य सेवनं नियमितं कर्तव्यम्। हरिद्रा तथा मयूरपिच्छस्य मिश्रणं कृत्वा तस्य लेपनं शरीरे कर्तव्यम्।

**मृगीयोगः ---**

लग्ने राहुः तथा षष्ठे चन्द्रः यदा वर्तते तदा एषः रोगः भवति।

**उपायः** -- राहु तथा चन्द्रस्य जपः, पाठं हवनं च।

**मुखरोगः ---**

लग्नस्वामी यदि मङ्गलग्रहस्य गृहे प्रथम अथवा अष्टमस्थाने बुधेन सह वर्तते तदा मुखरोगः भवति।

कर्क अथवा मेषराशेः कस्मिन्नपि स्थाने वर्तमानः शुक्रः मुखदुर्गन्धस्य कारणं भवति।

धनस्थाने सूर्यः मङ्गलग्रहस्य च यदि वर्तते तर्हि एषः रोगः भवति।

**उपायः** -- आदित्यस्त्रोतस्य पाठः।

**मतिभ्रमरोगः** ---

लग्ने यदा शनिः तथा नवमे, पच्चमे, सप्तमे मंगलग्रहस्य सम्बन्धः भवति तदा एषः योगः भवति।

द्वादशस्थाने शनिः तथा चन्द्रमा यदा क्षीणो भवति तदा मनुष्यः शनैः-शनैः मतिभ्रमतां प्रति गच्छति।

**उपायः** -- सरस्वतीसूक्तस्य पाठः।